शारदाकण्ठाभरणम्

(शारदास्तुतिः)

राष्ट्रभाषानुवादसहितम्

रचयिता

शिवानन्दब्रह्मचारी

परिमार्जित तालिका			
श्लोक	संख्या	अशुद्ध	शुद्ध
तुङ्गातटे में		वीणां	वीणा
किञ्चिन्निवेदनम् में		दोषास्तेः	दोषास्तैः
डॉ.सु.ऐ.शास्त्री जी के लेख में		ब्रह्माऽङ्गीजनत्	ब्रह्माऽजीजनत्
को वा में		कुर्वन्ति	कृण्वन्ति
ऋषीणां में		प्रभा	प्रमा
श्लोक संख्या	2 में	मन्त्राभिः	मन्त्रिभिः
श्लोक संख्या	11 में हिन्दी	अग्रिणी	अग्रिणी होकर
श्लोक संख्या	15 में	अभिव्यजित	अभिव्यञ्जित
श्लोक संख्या	16 में	क्लीं कार	क्लींकार
श्लोक संख्या	17 में हिन्दी		प्रभावोत्पादक
श्लोक संख्या	20 में	भीतिभृत	d
श्लोक संख्या	27 में	त्वल्पदम्	त्वत्पदम्
श्लोक संख्या	29 में	बध	वन्द्य
श्लोक संख्या	30 में	श्रुवण	श्रवण
श्लोक संख्या	55 में	परिष्टत	परिवेष्टित
श्लोक संख्या	57 में	आद्य	आद्या
श्लोक संख्या	80 में	शास्त्रीवाद्यों	शास्त्रीयवाद्यों
श्लोक संख्या	81 में	सात्विक	सात्त्विक
श्लोक संख्या	92 में	अलङकृत	अलङ्कृत
श्लोक संख्या	96 में	उन लोग	वे लोग
श्लोक संख्या	97 में	आकणर्यते	आकर्ण्यते
श्लोक संख्या	104 में	सङदोष	सङ्गदोष
श्लोक संख्या	105 में	लोगों का	लोगों के
श्लोक संख्या	118 में	प्रलोभ की	d
श्लोक संख्या	118 में	सर्वाथ	सर्वार्थ
पृष्ठ संख्या 66 में		करकं	कारकं
पृष्ठ संख्या 66 में		भक्तिक्ति	भक्ति शक्ति

शारदाकण्ठाभरणम्

(शारदास्तुतिः)

राष्ट्रभाषानुवादसहितम्

रचयिता

शिवानन्दब्रह्मचारी

वाराणसी

ॐ

प्रथम मुद्रण २००५

कापियां ५००

मूल्य /-

मुख चित्र :
मनीष ग्राफिक्स
जद्दूमण्डी, लक्सा, वाराणसी

●

प्रकाशक :
इउरेका प्रेस
गोदौलिया, वाराणसी

-:●:-

पुस्तक प्राप्ति स्थान -

1. डी. 54/1 टेकरामठ, लक्सा, वाराणसी
2. श्रीमलयाल स्वामिमठ
सी.के. 32/25 नेपालीखपरा, वाराणसी
3. शारदा संस्कृत संस्थान, जगतगंज, वाराणसी
4. चौखम्बा विश्वभारती, चौक, वाराणसी

-: 卐 :-

ॐ

सुधीन्द्रसेव्यं सुरलोकसन्नुतं ।
नरावतारं नवदीप्तिसंयुतम् ।।
विनूत्न-विख्यात-विशुद्धसद्गुरुं ।
नमामि देवं निखिलैरभीप्सितम्।।

दया प्रपूर्णदेवदेवमार्यकार्यसाधकं,
सुरासुरेन्द्रवृन्दवन्द्यमीप्सितार्थदायकम्।
महीगतं मुदा सदा महामनीषिसेवितं,
नमामि बालकृष्णनामकेश्वरं यतीश्वरम्।।

श्रुतं त्वदीयं सुरतुल्यवैभवं,
समस्तशिष्टैः सततं प्रशंसितम्।
अनाथनाथेव सदाऽत्र सेवकं,
प्रभो विमुग्धं परिपाहि पामरम्।।

-:卐 :-

प्रार्थना

मूर्धन्यमहिमा यस्य सर्वैः सर्वत्रगीयते ।
बालकृष्णयतीन्द्रोऽयं ब्रह्मनिष्ठो विराजते।।

महनीयकृपां महिमान्वित! तां विनिवेशय ते मयि देशिक भो ।
इह बालसमन्वित-कृष्णयते ! बहुधार्चित! मामपि तारय भो।।
विबुधाभिनुतां विधिवादरतां यतिकाङ्क्षितमार्गगतां महिताम् ।
मधुबोधक! माधव! बोधयुतां विनिवेशय ते मयि देशिक भो।।
अभिरामयुता-मभिधामयुतामखिला-श्रमतोषित-रागयुताम् ।
परमेश्वर! पूर्णपरात्पर! तां विनिवेशय ते मयि देशिक भो।।
श्रुतिपारगतां शुभसारयुतां श्रितदीन-जनावन-तत्परगाम् ।
मतिदोषनिवारक! तारक! तां विनिवेशय ते मयि देशिक भो।।
महिमाभियुतामतिमान्द्यतुदां प्रतिबोधित-संसृति-नीरसताम् ।
चिरचञ्चलतामपनोदक! तां विनिवेशय ते मयि देशिक भो।।
निवरद्यगुणाकर! नीतियुतां निजभक्तसमीहित-रीतियुताम् ।
कलिमोचक! तां कृतिमोदक! तां विनिवेशय ते मयि देशिक भो।।
सकलेप्सित! तां समदीप्तियुतां सकलैरभिनन्दित-सौख्ययुताम् ।
सहजामतिमञ्जुलधीलसितां विनिवेशय ते मयि देशिक भो।।
गणनीयगुणान्वित! तां महतां ममभाग्यवशादिह भासित! ताम् ।
अतिमानव! तां प्रतिपादक! तां विनिवेशय ते मयि देशिक भो।।
निखिलेश्वर! निर्मल! शान्तियुतां निखिलागमसन्नुतदान्तियुताम् ।
परिभावित! पूजित! देवनुतां विनिवेशय ते मयि देशिक भो।।
दृढ-भक्तिसमन्वितभावयुतो बहुभाग्य-विधायकपूज्यगुरुम् ।
विधिना परिपूजितपूज्यशिवं परिपूज्य नमामि सदाशिवदम्।।

कृपा काङ्क्षी भवेद् यो वै, स वै सम्पूजयेद् गुरुम् ।
अनेनाऽसौ कृपां लब्ध्वा, काङ्क्षितं लभते ध्रुवम् ।।

-: 卐 :-

टेकरामठस्थः
वाराणसी

रचयिता
शिवानन्दब्रह्मचारी

काव्यं मदीयं कस्मै प्रदेयम्



संवीक्ष्य दिव्याद्भुतपूज्यपूज्यं
श्रीबालकृष्णाख्ययतिंयतीन्द्रम्।
नत्वाऽर्पयन् तेऽत्र मदीयकाव्यं
नन्दामि हस्ताम्बुजयोरनिन्द्यम्॥

टेकरामठस्थः
वाराणसी

-: 卐 :-

विनीतः
शिवानन्दब्रह्मचारी

तुङ्गातटे तुहिनहारसमानभासां,
शातोदरीं शशिकलाकलितावतंसाम्।
चन्द्राननां चकितबालकुरङ्गनेत्रां,
वीणाविनोदनिरतां कलयामि वाणीम्।।

प्रसूनैराकीर्णे परमसुखदे मन्दिरगृहे,
स्थितां ध्यायन् धायन् यदि जपति भक्तस्तवमनुम्।
स गन्धर्वश्रेणीपतिरिव कवित्वामृतनदीं,
गिरीणामप्यन्तं बहुविधसुखं याति सततम् ।।

सर्वरूपमयी देवी सर्वं देवीमयं जगत् ।
अतोऽहं विश्वरूपां तां नमामि परमेश्वरीम्।।

बुद्धिर्मे कुण्ठिता मातः समाप्ता मम युक्तयः।
अन्यथा शरणं नास्ति त्वमेव शरणं मम ।।

-:卐 :-

अभ्यर्थना

वीणाधरे विपुलमङ्गलदानशीले, भक्तार्तिनाशिनि विरिञ्चिहरीशवन्दे।
कीर्तिप्रदेऽखिलमनोरथदे महार्हे, विद्याप्रदायिनि सरस्वति नौमि नित्यम्।।

आरूढा श्वेतहंसे भ्रमति च गगने दक्षिणेचाक्षसूत्रं,
वामे हस्ते च दिव्याम्बरकनकमयं पुस्तकं ज्ञानगम्यम्।
सा वीणां वादयन्ती स्वकरकरजपैः शास्त्रविज्ञानशब्दैः,
क्रीडन्ती दिव्यरूपा करकमलधरा भारती सुप्रसन्ना।।
शुभ्रां शुभ्रसरोजमुग्धवदनां शुभ्राम्बरालङ्कृतां,
शुभ्राङ्गीं शुभशुभ्रहासविशदां शुभ्रस्रगाशोभिनीम्।
शुभ्रोद्दामललामधाममहिमां शुभ्रान्तरङ्गागतां,
शुभ्राभां शुभदिव्यभावभरितां श्रीभारतीं भावये।।
मुक्तालङ्कृत-कुन्तलान्तसरणिं रत्नालिहारावलिं,
काञ्ची-कान्तवलग्नलग्नवलयां वज्राङ्गुलीयाङ्गुलिम्।
लीला-चञ्चललोचनाञ्चलचलल् लोकेशलोलालकां,
कल्यामाकलयेऽतिवेलमतुलां वित्कल्पवल्लीकलाम्।।
आद्या त्वं जगदम्बिके सहचरी मतिर्वपुर्मन्दिरम्,
पूजा ते सकलेन्द्रियैरनुभवः स्वापःप्रणामाञ्जलिः।
संसारेगमनं प्रदक्षिणाविधिःस्तोत्राणि यज्जल्पनं,
यद्यत् कर्म करोमि तत्तदखिलं मातस्तवाराधनम्।।
इत्येतैः श्लोकमुख्यैः प्रतिदिनमुषसि स्तौति यो भक्तिनम्रः,
वाणीं वाचस्पतेरप्यविदितविषयो वाक्पटुर्मृष्टकण्ठः।
स स्यादिष्टार्थलाभैः सुतमिव सततं पाति तं सा च देवी,
सौभाग्यं तस्यलोके प्रभवति कविताविघ्नमस्तं प्रयाति।।
निर्विघ्नं तस्यविद्या प्रभवति सततं चाश्रुतग्रन्थबोधः,
कीर्तिस्त्रैलोक्यमध्ये निवसति वदने शारदा तस्य साक्षात्।
दीर्घायुर्लोकपूज्यः सकलगुणनिधिः सन्ततं राजमान्यो,
वाग्देव्या सम्प्रसादात् त्रिजगति विजयी जायते सत्सभासु।।

-: 卐 :-

शारदाकण्ठाभरणम्

(शारदास्तुतिः)



श्रीमच्चन्दनचर्चितोज्ज्वलवपुः शुक्लाम्बरा मल्लिका-
मालालालितकुन्तला प्रविलसन्मुक्तावली - शोभिता।
नाना ज्ञाननिधानपुस्तकधरा रुद्राक्षमालाङ्किता,
वाग्देवी वदनाम्बुजे वसतु मे त्रैलोक्यमाता शुभा॥



पं० रामयत्नःशुक्लः

पूर्वव्याकरणविभागाध्यक्षः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी

विद्वदाशंसनम्

-:१:-

विद्याप्रदे शिवावासे शास्त्रचिन्तासमाकुलः।
विश्वनाथकृपाकाङ्क्षः शिवानन्दः शुचिव्रतः।।

-:२:-

अधीत्यविविधं वेद्यं गुरुभ्यः प्राप्तविद्यकः।
काश्याम्बुधेषु विख्यातः कृतशास्त्रपरिश्रमः।।

-:३:-

परात्मतत्त्वसम्वेदी सदा सद्भावभावितः।
निरन्तरमनोयोगाद् बुद्धियुक् प्राणसंयतः।।

-:४:-

महात्मा गुणवान् श्रीमान् सरस्वत्या वरान्वितः।
वेदान्तादिविधापूर्णः काव्यसाररसान्वितः।।

-:५:-

लोककल्याणभावेन काव्यकृद् भारतीवशः।
जनतापनिराकृत्यै भारतीनुतिमान् कविः।।

-:६:-

शारदास्मृतिमात्रेण हितं लोकस्य मन्यते।
स्वात्मनो वैभवञ्चापि नान्यत्तत्कारणं विदन्।।

-:७:-

भावनैषा कवेर्व्यक्ता वसुधैवकुटुम्बकम्।
कण्ठाभरणमेतद्धि शारदायाः सदाऽस्तु नः।।

किञ्चिन्निवेदनम्

हर्षप्रहर्षस्य विषयोऽयं यद्दीक्षान्तसमारोहसन्दर्भे प्रथमदेवतारूपेण निर्देशितं ''मातृदेवोभव'' इत्युक्तिमालक्ष्य किञ्चिल्लेखनायासीत् कश्चन सत्सङ्कल्पः। यद्यपि तत्सङ्कल्पसिद्ध्यर्थमपेक्षितं वैदुष्यं वा साहसं वा मयि नासीत्। तथापि कयाप्यदृश्यशक्त्या प्ररितोऽहं कालिदासेनोक्तरीत्या ''तद्गुणैःकर्णमागत्य'' अपिच ''प्रांशुलभ्ये फले लोभादित्युक्तिं चरितार्थयन् पल्लवग्राहिपाण्डित्येनोपक्रामितवानस्मि। अपिच गुणग्रहिणां सहृदयहृदयानां पूज्यचरणानां गुरूणां समक्षेऽपि प्रायेणापतितदोषाणां परिमार्जनायोपस्थापितवानाऽसम्। अनेके दोषास्तैः परिमार्जिता, अनेन ग्रन्थ स्यास्योपादेयता सुस्पष्टतया प्रतिभाति ।

लेखनास्यास्याशयोऽयं विगठितसनातनीनां दौर्बल्यमालक्ष्य, वैदेशिका भारतभुवं स्वायत्तीकृत्य, तेषां कलुषितसंस्कारैरस्मानाच्छाद्य, यथा तैर्निर्देशितं तथैवानुपालनाय विवशीकृतवन्त आसन्। तैरारोपित-तत्संस्काराः सम्प्रत्यप्यस्मान्नैव परित्यजन्ति। अनेन सामाजिकसुव्यवस्था छिन्ना-भिन्ना च सञ्जाता। भारतभुवः परिचयायोक्तमस्ति यदश्वपतिमहाराजेन -

न मेस्तेनो जनपदे, न कदर्यो न च मद्यपः। नानाहिताग्निर्नाविद्वान्, न स्वैरी स्वैरिणी कुतः? इति ।

अतः प्राक्तन हैदवसंस्काराणां पुनरुज्जीवनाय यस्या अनुकम्पाऽपेक्षितास्ति तदनुकम्पाऽवात्यर्थं प्रथमतया ''शारदाकण्ठाभरणम्'' तदनु ''कमलाकटाक्षवीक्षणम्'' एवमेव ''शाम्भवीस्तोत्रवल्लरी'' इत्यभिधानेन तिस्रो मौलिककृतयो मया विरचिताः सन्ति।

सम्प्रति तु ''शारदाकण्ठाभरणम्'' पुस्तक रूपेण समेषां सज्जनानां, जिज्ञासूनां, विद्यार्थिनाञ्च करकमलेषु समलङ्करणाय सन्नद्धमस्ति। एनमवाप्याऽनुवीक्ष्याऽनुष्ठीयाऽपेक्षित-ज्ञानविज्ञानमासाद्य, भारतस्य प्राक्तन गौरवाधिगमाय यतिष्यन्तीति विश्वस्य विरमामि।

टेकरामठस्थः -: 卐 :- विद्वदनुचरः

वाराणसी **शिवानन्दब्रह्मचारी**



प्रो० शिवजी उपाध्यायः

पूर्वप्रतिकुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी

श्रीशारदाकण्ठाभरणस्य शुभाशंसा

-:१:-

शिवानन्देन कविना ब्रह्मचारिव्रताध्वना ।
शारदाकण्ठमुन्नेतुं तत्कण्ठाभरणंकृतम् ।।

-:२:-

आद्यन्तमखिलं काव्यं मयाऽऽलोकि मनोरमम् ।
भक्तिभावरसाऽऽश्लिष्ट-मुत्कृष्टमिव मोदकम् ।।

-:३:-

शार्दूलविक्रीडितवृत्तबद्धं
शब्दोच्छलद्भावनिगुम्फरम्यम् ।
स्तुतिप्रधानं ननु काव्यमेत्
श्रीशारदाकण्ठमलङ्करोति ।।

-:४:-

क्वचिद् रसोद्गीर्णपदप्रवृत्ति-
रलङ्कृतिःक्वापि निसर्गसिद्धा ।
क्वचिच्च भावोल्लसदङ्गसङ्गि
सङ्गीतवद्गीतमिदं सुकाव्यम् ।।

-:५:-

वस्तुतो भावनाभावितं पावितं
हृत्तरङ्गायितं काव्यमानन्दजम् ।
यन्निसर्गोज्ज्वलं सद्भिरास्वादितं
तत् प्रशस्यं सदा लोकशोकापहम् ।।

-:६:-

शारदाकण्ठमाभूषयत् सर्वदा
सर्वदाम्बापदाब्जस्तुतिप्राञ्जलम् ।
सुष्ठु नामानुरूपं शिवानन्दकृत्
काव्यमेतद् ध्रुवं सर्वमोदप्रदम् ।।

-:७:-

उदीयमानः कविरेष सम्यग्
भावाञ्जलिं स्वाभिनवं निवेद्य ।
स्तोत्रात्मकं काव्यमिदं प्रणीय
यशोऽधिगन्तुं स्वयमर्हतीति ।।

-:८:-

काव्यमार्गोऽयमत्युच्चैः क्लेशसाध्यः सतां मतः ।
कोऽन्वस्मिन् सञ्चरन् भूयो निर्दुष्टस्थितिमाप्नुते ।।

-:९:-

तद्वदत्राऽपि सुधियो दोषान् सन्त्यज्य दूरतः ।
गुणान् काव्यगतान् नूनं भावयन्तु कृपादृशा ।।

-:१०:-

अनेन स्तुतिकाव्येन शिवानन्दसुधीमता ।
कविनोत्साहिचित्तेन श्रेयः सौख्यमवाप्यतात् ।।

आश्विन् शुक्ल द्वितीया
दि. ५.१०.२००५

-:卐:-

शिवजी उपाध्यायः
वाराणसी

ॐ

सर्वचैतन्यरूपां तामाद्यां विद्याञ्च धीमहि ।
शारदां विश्वजननीं विश्वरूपां स्तुवीमहि ॥



डॉ0 सुधांशुशेखर शास्त्री
प्रोफेसर एवं अध्यक्षः
वैदिकदर्शनविभागस्य तथा पूर्वसङ्कायप्रमुखः
संस्कृतविद्या धर्मविज्ञान सङ्काय
काशीहिन्दूविश्वविद्यालय,वाराणसी-221005

अथेदानीं नयनविषयतामधिगच्छति यद् वाराणसीस्थ श्रीविश्वनाथ गुरूकुल संस्कृत-महाविद्यालयीय प्रधानाचार्येण श्रीशिवानन्देन विराचितोऽयं ''शारदाकण्ठाभरणम्'' इत्याख्यः श्री शारदा स्तवनग्रन्थ इति न परं ममैवापितु समेषामेवातीव प्रमोदास्पदं श्रीशारदाभक्तिप्रवणानां विदुषाम् ।

सर्वास्वपि संपत्सु गरिष्ठतमा वरिष्ठतमैव संवित्संपद्, यया विना परिलुप्येत सर्वोऽपि व्यवहार ऐहिक-आमुष्मिकश्चेति निर्विवादस्थलतयैव सर्वैरप्यभ्युपगम्यते विपश्चिद्भिः। तत्संपत्संप्रदात्री तत्स्वरूपा च जगद्धात्री श्रीशारदाम्बा कृत्स्नस्यापि प्रपञ्चजातस्य प्रसवित्री । तदुक्तम् - ''सदेव सोम्येदमग्र आसीद्-एकमेवाद्वितीयम्'' (छा.६/२/१) ''देवी ह्येकाग्र आसीत्, सैव जगदण्डमसृजत, तस्या एव ब्रह्माऽज्ञीजनत् विष्णुरजीजनत् रूद्रोऽजीजनत्'' (बह्वृच उप0) इति

''अहमेवासं पूर्वं तु नान्यत्किञ्चिन्नगाधिप !
तदात्मरूपं चित्संवित् परब्रह्मैकनामकम् ।।'' (दे0भा0)

''पुरा सर्गादिसमये त्रिपुरा चितिरूपिणी
एकासीन्नेतरस्तस्याः किञ्चिदपि स्थितम्''(त्रि.र.ज्ञा.10-18) इति च

चिच्छक्तिरेषैव निरतिशयव्यापकत्वाद् ब्रह्मेति गीयते, ''चिच्छक्तिस्वरूपमात्रः'' शक्तिर्ब्रह्मैव'' इतिश्रीमद्भगवत्पादोक्तेः । शक्तिशब्दस्तु तत्त्वपर्यायः ''स्वरूपप्रतिष्ठा वा चितिशक्तेः कैवल्यम्'' 'चितिशक्तिप्रतिसङ्क्रमा अपरिणामिनी'' इत्यादिना योगदर्शनादौ तथाभ्युपगमात् ।

"चितिशक्तिः" पराशक्तिः" महाशक्तिः" शारदाम्बा"

इत्यादिस्त्रीलिङ्गशब्दप्रयोगास्तु मातृभावनायत्त एव । वस्तुतस्तु निर्विशेषंब्रह्मैव सा । अत एवोक्तम् ।

"न स्त्री न षण्ढो न प्रमाँस्त्रिपुराचिच्छरीरिणी अवाङ्मनसगम्या सा चेत्यनिर्मुक्तचिन्मयी" इति अस्या एव सविशेषनिर्विशेषभेदेन रूपद्वयं श्रूयते। "यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, यत्रत्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्"। "यत्रनान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा, अथ यत्राऽन्यत्पश्याति, अन्यच्छृणोति, अन्यद्विजानाति तदल्पम्, यो वै भूमातदमृतम्, यदल्पं तन्मर्त्यम्" इत्यादिवाक्येभ्यः ।

शिवोऽपि न तदतिरिक्तः शिवशक्त्योः सर्वथाऽभेदस्यागमादिवचनेष्वुपलम्भात् ।

"न शिवेन विना देवी न देव्या च विना शिवः ।
नानयोरन्तरं किञ्चित् चन्द्रचन्द्रिकयोरिव" इति ।
"शिवशक्तिरिति ह्येकं तत्त्वमाहुर्मनीषिणः" इति च ।

तदत्रापि शारदाकण्ठाभरणे परदेवतायाः श्रीशारदायाः सर्वात्मकत्वं सर्वाधिष्ठात्रित्वं सर्वातिशायित्वं सविशेषनिर्विशेषादिकं विविधं स्वरूपञ्चोपवर्णितं श्रीमता शिवानन्देन विदुषेति मन्ये, तेन तद्व्याजेन समर्चिता श्रीशारदाम्बा ऽभिगमनोपादानेज्या-स्वाध्याय-योगेष्वन्यतमभूतेन स्तवनात्मकेनार्चनेन, समर्च्य च तामेतेनान्येऽपि श्रीशारदासमुपासकाः कृतार्था भविष्यन्तीति ।

अतोऽहमन्तेऽस्य ग्रन्थस्य सर्वत्राऽप्रतिहतं प्रचारं प्रसारं ग्रन्थकर्तुश्च सर्वविधभ्युन्नतिञ्च कामयमानो भगवन्तमकारणकरुणावरुणालयं श्री श्री विश्वेश्वरं प्रार्थये यत्श्रेयान् श्रीशिवानन्दब्रह्मचारी स्वस्थः प्रसन्नः सन्नीदृशेन श्री शारदासेवात्मकेन कार्येण सदैवोपकुर्यात् सज्जनानिति ।

सुधांशुशेखर शास्त्री

शारदाभवनम्
लाहौरीटोला, वाराणसी

26.9.2005

निवेदनम्



समुद्राल लक्ष्मणय्य
साहित्यशिरोमणिः, एम्.ए.
१८-१-८४, यशोदा नगरम्
तिरुपति, आन्ध्रप्रदेशः

श्रीशारदादेवीस्तोत्रात्मकं गीर्वाणवाणीमयं शार्दूलवृत्तनिबद्धं "शारदाकण्ठाभरणं" सश्रद्धं मया पठितम्। अत्र १२३ पद्यानि फलश्रुतिसमेतानि सन्ति ।

स्तोत्रमिदमत्यन्तं सरलायां शैल्यां आरचितं विराजते । वाग्देव्या वैभवमत्र परमरमणीयतया वर्णितम् ।

न केवलं देवीस्तुतिः, परन्तु स्तुतिव्याजेन भारतदेशस्य आधुनिकी स्थितिरपि अत्र निर्दिष्टा । अपिच तस्याः स्थितेः संस्करणार्थमवश्यमनुष्ठेयानि परिवर्तनान्यपि कविना सुष्ठु निर्दिष्टानि।

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं निदेशं शिक्ष्येरन् पृथिव्यां सर्वमानवाः ॥

इति वचनं सफलीकर्तुं यादृश उद्यम आवश्यक आसीत्, तत्सर्वोऽस्मिन् ग्रन्थे महता प्रबन्धेन प्रस्तुतोऽस्ति ।

एतद्रचयितारः श्रीशिवानन्दब्रह्मचारिणः आन्ध्रप्रदेशे तिरुपति-श्रीकालहस्तिक्षेत्रयोर्मध्ये श्रीमलयालसद्गुरुस्वामिभिः स्थापिते श्रीव्यासाश्रमे बाल्ये संस्कृतमभ्यस्य तदनु काशीक्षेत्रे उन्नतशास्त्रविद्यामधिजग्मुः । तदनन्तरं काश्यामेव संस्कृतविद्यालये बहून् छात्रान् संस्कृतविद्यापारङ्गतान् कृत्वा कृतकृत्या बभूवुः ।

श्रीशिवानन्दैरितः पूर्वमेव अनेकाः कृतयः संस्कृते निबद्धा विराजन्ते। अधुना तैः प्रकाशितमिदं श्रीशारदाकण्ठाभरणम् विस्तृतां व्याप्तिं प्राप्य भारतीयसंस्कृतेः प्रतिष्ठां द्विगुणीकृतां करोतु इत्याशासे।

तिरुपति
२.१.२००५

-:卐 :-

इति शिवम्
समुद्राल लक्ष्मणय्य

को वा आसमृद्धिहेतुः?

शिवसङ्कल्पः

तद् यथा -

यज्जाग्रतो दूरमुदैति देवन्तदुसुप्तस्य तथैवैति।
दूरङ्गमञ्ज्योतिषाञ्ज्योरेकन्तन्मे मनः शिवसङ्ल्पमस्तु।।
येन कर्माण्यपसो मनीषिणो यज्ञेकुर्वन्ति विदथेषुधीराः।
यपूर्वं यक्षमन्तः प्रजानां तन्मेमनः शिवसङ्कल्पमस्तु।।
यत्प्रज्ञानमुत चेतोधृतिश्च यज्जोतिरन्तरमृतं प्रजासु।
यस्मान्न ऋते किञ्चन कर्मक्रियते तन्मेमनः शिवसङ्कल्पमस्तु।।
येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेनसर्वम्।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु।।
यस्मिन्नृचः सामयजूँषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः।
यस्मिँश्चित्तं सर्वमोतंप्रजानां तन्मे मनः शिवसङ्कल्पमस्तु।।
सुषारथिरश्वानिव यन्मनुष्यान्नेनीयते भीशुभिर्वाजिन इव।
हृत्प्रतिष्ठं यदजिरञ्जविष्ठन्तन्मे मनः शिवसङ्कल्पमस्तु।।

-:卐:-

ऋषीणामुदात्तभावना

तद्यथा-तैत्तरीयोपनिषदि

तद् यथा -

आमायन्तु ब्रह्मचारिणः स्वाहा, विमायन्तु ब्रह्मचरिणः स्वाहा, प्रभायन्तु ब्रह्मचारिणः स्वाहा, दमायन्तु ब्रह्मचारिणः स्वाहा, शमायन्तु ब्रह्मचारिणः स्वाहा ।

यशोजनेऽसानि स्वाहा।। श्रेयान् वस्यसोऽसानि स्वाहा।। तं त्वा भग प्रविशानि स्वाहा।। सा मा भग प्रविश स्वाहा।। तस्मिन् सहस्रशाखे निभगाहं, त्वयि मृजे स्वाहा।।

यथापः प्रवतायन्ति, यथा मास अहर्जरम् ।
एवं मां ब्रह्मचारिणः, धातरायन्तु सर्वतः स्वाहा ।।
प्रति वेशोऽसि प्रमा पाहि प्रमा पद्यस्व।
वितन्वाना शमायन्तु ब्रह्मचारिणः स्वाहा ।।

-:卐:-

रचना का उद्देश्य

भारतीय मनीषी एवं महर्षियों के दिल में देवी के प्रति जो सम्मान का भाव था उसकी अभिव्यक्ति कृतियों के रूप में, कविता के रूप में, स्तुति के रूप में एवं सूक्तियों के रूप में कर चुके हैं । आदि कवि वाल्मीकी शील एवं सौन्दर्य के संवाहिका मानकर अथवा उन गुणरूपों के प्रतिनिधि मानकर लोकोत्तर सुन्दरी माँ जानकी का प्रस्तुतीकरण आदि काव्य के नाम से प्रसिद्ध रामायण में कर चुके हैं । यह प्रक्रिया देवी के प्रति उनके दिल में अवस्थित अगाध निष्ठा की अभिव्यक्ति है । इसी परम्परा के महर्षि अगस्त्य, महर्षि मार्कण्डेय, भगवान वेदव्यास, भगवान शङ्कराचार्य, कविकुल शिरोमणि कालिदास, महामनीषी अभिनवगुप्त और महामहोपाध्याय गोपीनाथ कवरिज आदि गणनीय रचनाकारों के मातृभक्ति से प्रेरित होकर, मैंने भी शक्तित्रयात्मक माँ शारदा, लक्ष्मी एवं काली जी का वर्णन करने का दुःसाहस कर बैठा हूँ । यह वर्णन तो कालिदास के कथनानुसार "तद्‌गुणैः कर्णमागत्य चापलाय प्रचोदितः" के अनुरूप है अथवा अनन्य शिव भक्त पुष्पदन्ताचार्य के कथनानुसार "पुनामीत्यर्थेऽस्मिन्" अपनी चित्तवृत्तियाँ एवं समय की सार्थकता को ध्यान में रखकर किया गया है अथवा गोस्वामी तुलसीदास के अनुसार "करन पुनीत हेतु निजबानी" अपने मन एवं वाणी को पवित्र करने के उद्देश्य से किया गया है ।

अनादि काल से लेकर आज तक जो भी परिवर्तन समाज में अपेक्षित है । वह परिवर्तन पुरूषों से सम्भव नहीं होने पर नारी शक्ति सक्रिय हो जाती है । नार शब्द नीरार्थक होते हुए भी ज्ञानार्थक है । "नारे नीरे अयनं शयंन" इस निर्वचन के अतिरिक्त "नारं ददातीति नारदः" इस निर्वचन के अनुसार ज्ञान प्रदान करने वाली माँ शारदा, ऐश्वर्य प्रदान करने वाली माँ लक्ष्मी एवं शक्ति मुक्ति प्रदायिका माँ काली का अत्यन्त संक्षिप्त वर्णन ही इस रचना का मुख्य उद्देश्य है अथवा "प्रसून् माता

विशेषतः ''मातृ देवोभव'' इत्यादि श्रुति का आदेश शिरोधार्य मानकर इस रचना का प्रयास किया गया है ।

आजकल जिस भारत के हम निवासी हैं । भारतीय कहे जाते हैं। अमरवाणी, देववाणी अथवा सुरभारती के रूप में जिस भाषा का प्रचलन था और सम्पूर्ण भारत में सबकी मातृभाषा के रूप में अवधारित थी। आज भी भारत में अपनी मातृभाषा के रूप में संस्कृत भाषा को सम्पूर्ण व्यवहारों में प्रयोग करनेवाली परम्परायें विद्यमान है । संस्कारित किये जानेवाली भाषा को संस्कृत कहा जाता है । उसी संस्कृत को भारती भी कहा जाता है । पाशविक वृत्तियों से मुक्ति दिलाकर अपने अन्तर्निहित पशुपतित्व का ज्ञापन ही संस्कृत वाङ्मय में आरचित वेदों का मुख्य उद्देश्य है अथवा दानवीय वृत्तियों के प्रभाव से प्रभावित न होकर दैवी गुणों के आविष्कार के निमित्त इस भाषा के माध्यम से निर्देशित निर्देशों के अनुपालन के रूप में जप-तप, व्रतानुष्ठान एवं स्नान दान पूजादिकों का वर्णन किया गया है। शास्त्रानुमोदित अनुष्ठानों में चित्तनिर्मल हो जाता है। चित्त की निर्मलता में सात्विक आहार एवं संयम-नियमों की महती आवश्यकता है। चिरकाल पर्यन्त अनुशीलित नियमों से व्यक्ति के व्यवहारों में अवश्य ही परिवर्तन आ जाता है । दैवीगुणों से विशिष्ट व्यक्ति न झूठ बोल सकेंगे, न ठग सकेंगे, न वंचक बन सकेंगे अथवा नितान्त स्वार्थ प्रपूर्ण व्यवहार कर सकेंगे ।

ऐतिहासिक तथ्यों के आकलन से अवगत होता है कि यहाँ के जन मानस में त्याग की, योग की, परार्थभावना की प्रमुखता दी जाती थी । तपो भूमि के रूप में प्रसिद्ध यह भारत, परार्थभावनाओं से परिप्लुत यह भारत, आज भारत कहे जाने की अर्हता खो बैठा है । जितनी असत्यवादिता, स्वार्थपरता, चोरी, हत्याएँ एवं डकैती आदि दिन दहाड़े हो रही है । इससे भारत का गौरव निरन्तर घटते जा रहा है । भारत को भारत के रूप में चित्रित करने के निमित्त भारती की उपासना नितान्त आवश्यक है ।

इसके अतिरिक्त समृद्धि के निमित्त विशुद्ध ज्ञान की आवश्यकता है। निःशक्तराष्ट्र को सर्वत्र अपमानित होना पड़ता है । सशक्त होने के निमित्त शक्ति स्वरूपिणी माँ भगवती भवानी की आराधना भी अपेक्षित है। इन तीनों देवियों की औपासनिक आवश्यकता के प्रति जन मानस को आकर्षित करने के उद्देश्य से ही इस रचना का शुभारम्भ किया गया है।

इसके अतिरिक्त आज की युवा पीढ़ी वैदेशिक प्रचारों से प्रभावित होकर, क्षणिक सुखों के मायाजाल में स्वच्छन्द विहार कर रही हैं । इन स्वैच्छिक, व्यवहारों के दुष्परिणामों से वे पूर्णतया अनभिज्ञ हैं । शिक्षा तो मिल रही है किन्तु संस्कार नहीं मिल पाने के कारण संयम विहीन होकर, सांक्रामिक रोगों से पीड़ित होकर, निस्तेज एवं मृततुल्य जीवन यापन कर रहे हैं । उनमें परिवर्तन की आवश्यकता है । सहनशीलता की आवश्यकता है। संयमिता की आवश्यकता है एवं सदाचारिता की आवश्यकता है। एतदर्थ माँ भगवती की अनुकम्पा की अपेक्षा से इस रचना की आवश्यकता का अनुभव करते हुए, विभिन्न निमित्तों के माध्यम से समाज में परिवर्तन लाने की प्रार्थना उनसे की गई है ।

आशा करते हैं कि "मेरा भारत महान्" की उक्ति सार्थक होकर सर्वाकर्षक होकर, अतीत के गौरव को अविलम्ब प्राप्त कर सके इसके निमित्त माँ भगवती की स्तुति की गई है । षट्कर्म पथ के पथिक होकर विश्वगुरु के रूप में विश्वख्याति को अर्जित करनेवाले द्विजश्रेष्ठ अपने परिवर्तित वेषभूषा को त्याग कर, आदर्शमय जीवन जीने का उपक्रम कर सकें एवं भारत में जिस भूदेवता की उपाधि से सम्मानित सद्विप्र अपनी सत्यवादिता सच्चरित्रता तथा परार्थभावना से सबको अपनी ओर आकर्षित कर सकें, इस उद्देश्य की सफलता के निमित्त माँ शारदा से प्रार्थना की गई है। परिपूर्ण विश्वास है कि भारत एक आदर्श राष्ट्र के रूप में समृद्धि को अर्जित करते हुए ज्ञान-विज्ञान के माध्यम से सशक्त होकर, अपने अतीत गौरव को प्राप्त करने में सफल हो सकता है । इन्ही आशयों का अग्रिम रचनाओं के द्वारा उपक्रम करने का विचार है ।

पल्लवग्राही पाण्डित्य परिहास का अवसर प्रदान कर देता है । फिर भी "मन्दः कवियशः प्रार्थी" इस उक्ति से प्रेरित होकर साहस तो कर बैठा हूँ और वस्तुस्थिति के अवगाहन के निमित्त, श्रद्धेय पूज्य गुरुजनों के समक्ष प्रस्तुत करने का साहस भी कर दिया था । लेकिन सहृदयहृदय गुरुजनों का जितना भी गुणगान करें वह गुणगान उन लोगों के अनन्त दिव्य गुणों के अनुरूप हो ही नहीं सकता है ।

सर्वगुण सम्पन्न पूज्य श्री रामयत्न शुक्ला जी गुरुजी ने स्थाली पुलाक न्यान से "शारदा कण्ठाभरणम्" को अपने पवित्र दृष्टि से पुनीत करते हुए, मेरे आशयों के परिप्रेक्ष्य में सारगर्भित श्लोक लिखकर मेरे उत्साह को विवर्धित करने की कृपा की है और सरस्वती के वरदपुत्र एवं देश विदेशों में लब्धयशश्वी पूज्य श्री रेवा प्रसाद द्विवेदी, गुरूजी ने "शरदाकण्ठाभरणम्" को आमूलाग्र अक्षरशः अवलोकन पूर्वक, अपेक्षित संशोधनों को अङ्कित करते हुए, मेरे अग्रिम रचनाओं के प्रति औत्साहिक साहस बढ़ाने का मार्ग प्रशस्त कर दिया है और अभिनव कालिदास के रूप में विख्यात पूज्यश्री शिवजी उपाध्याय जी गुरूजी ने शारदाकण्ठाभरणम्" को एक प्राञ्जल काव्य के रूप में चित्रित करने के निमित्त महत्वपूर्ण योगदान देकर और अपने सारस्वतिक समुपासना के परिपक्वता के ज्ञापक अपनी काव्यकला का उत्कृष्ट परिचय स्वरूप पद्यों के प्रणयन पूर्वक मेरे ऊपर एवं मेरे काव्य के ऊपर महती कृपा की है और शिष्यवत्सलता में अग्रगण्य एवं गणनीयवैदुष्य विशिष्ट पूज्य श्री सुधांशु शेखर शास्त्री जी गुरुजी ने अपनी दिनचर्या एवं परमतपस्वी श्री शिवचैतन्य जी महाराज श्री की सेवा शुश्रूषा में व्यस्त रहते हुए भी मेरी प्रार्थना सुनकर, एक विद्वत्त्रपूर्ण सम्मति देकर अविस्मरणीय महती कृपा की है। इन सभी गुरुजनों के प्रति मैं अपने को ऋणी मानकर अत्यन्त विनम्रता के साथ कृतज्ञता ज्ञापन कर रहा हूँ ।

इस के अतिरिक्त पुस्तक के मुख पृष्ठ के चित्रण में सहयोग देनेवाले जद्दुमण्डी के मनीष कम्प्यूटर के सञ्चालक श्री बी.डी.मिश्रा

जी एवं इउरेका प्रेस के संचालक एवं मालिक श्री प्रवीर दत्त जी तथा उनके सहयोगी के रूप में प्रसन्नचित होकर अपनी सेवा प्रस्तुत करने वाले अक्षर संयोजक एवं चित्रण कला में कुशल आत्मीय सन्तोष शर्मा जी एवं उसी प्रेस में सेवा करने वाले उत्साही कर्मचारियों की कार्यकुशलता के प्रति हृत्पूर्वक आभार व्यक्त कर रहा हूँ। और मेरे जैसे अल्पज्ञ के लिए "शारदाकण्ठाभरणम्" का प्रणयन एक दुस्तर कार्य था फिर भी जिन लोगों की कृपा एवं सद्भावना से मेरी कामना एवं कल्पना चरितार्थ होकर, पुस्तक का रूप धारण करके, आप लोगों के कर पल्लओं में समलङ्कृत हो रहा है। आप लोग यथा सम्भव यथेष्ट पाठ करते हुए, अपने अभीप्सित कामनाओं को माँ शारदा के माध्यम से प्राप्त करने की चेष्टा करेंगे और मेरा अटूट विश्वास है कि जो भी विद्यार्थी नियमित एवं निष्ठा के साथ कण्ठाभरणम् का पाठ करेंगे तो, वे अवश्य ही विद्वन्मण्डली को चकित करने वाले वैदुष्य को प्राप्त कर ही लेंगे । माँ शारदा सब को सद्विचार पूर्वक समृद्धि प्रदान करें । इन्ही कामनाओं के साथ राष्ट्र एवं राष्ट्रीय जनता की सेवा में तत्पर -

शिवानन्द ब्रह्मचारी

-: 卐 :-

पुस्तकेऽस्मिन् द्रष्टव्यांशाः

कमनीयेयं काशी

शान्तः कैलासवासी सकलभुवनभृन्निर्विकल्पोऽविनाशी,
काशीं संस्त्रष्टुमिच्छन्नतिशयसुखदां सर्वविघ्नैर्विहीनाम् ।
एकाकी कीदृगेनां निखिलभयहरां संसृजे सर्वसेव्या-
मित्येवं ध्यानमग्नोऽधिगतशुभधियाऽमोघसंङ्कल्पशक्त्या-
दिव्यामासृज्य काशीं नियतनिधियुतां मूर्तरूपामपूर्वां,
संस्थाप्येनां त्रिशूलोपरि विधिवदुपास्येति तेनोपदिष्टा ।
या काशी नित्यसेव्या प्रमथगणयुता विश्वनाथेन स्त्रष्टा,
सा नस्त्रैलोक्यपूज्या सहजहितकरा पातु मातेव नित्या ॥

—:卐 :—

मदीयेयमवधारणा

काश्यां काशितकालभैरवकृपा— लेशातिरेकं विना,
काशीक्षेत्र —निवेशनं मुहुरहो गङ्गाम्बुभिर्मज्जनम् ।
काशीशादि—समस्तदैवतगणाऽऽसंसेवनं पूजनं,
नो लभ्यं शतधा सुसज्जितमहायत्नादिति श्रूयते ॥
नाना— जन्मसु सञ्चिताच्चसुकृतैर्लभ्यं भवद्दर्शनं,
योगीन्द्रागमसन्नुतं सुललितं मत्वा सुशान्तिप्रदम् ।
आसीद् देवपदारविन्दयुगले चानन्य—निष्ठा सदा,
किन्त्वाप्तात्तवदर्शनान् मम मतिः साफल्यमाशंसति ॥

—: 卐 :—

मनीषा ममेयम्

भो देवेश! धरागता मम तनुः प्रारब्धभोगादियं,
काश्यां वा हिमशैलराजशिखरे पार्श्वे च गङ्गातटे ।
रम्ये श्रीगिरिकन्धरे वसतु वाऽरण्ये वने दुर्गमे,
किञ्चेयं मम चित्तवृत्तिरनिशं श्रीसन्निधौ लीयतात् ॥

—: 卐 :—

वाराणसी — शिवानन्दब्रह्मचारी

तामाह्वये सिताम्

शुद्धां प्रबुद्धां सकलैर्निबद्धां,
स्निग्धां सुधीन्द्रैः प्रणतां प्रसिद्धाम्।
सिद्धान्तविद्वेद्यतदादिसिद्धां,
मुग्धां सदा नौमि सरस्वतीं त्वाम्।।

प्राक्तनेयं प्रपत्तिः

विश्वात्मिका विमलपूज्यगुणैरुपेता
विख्यातदिव्यचरिता विधिना नियुक्ता।
सा भारती सुरगुरोर्महिता समन्ताद्
विश्वाधिपैरभिनुता जयतात् प्रसिद्धा।।
वीणाविभूषितकरां विशदाभिरामां
श्वेताम्बरां सकलदां सदयां प्रसिद्धाम्।
अब्जासना-मभयदा-मरविन्द-नेत्रां
वाणीं विशुद्धचरितां विततां नमामि।।

वागीश्वरीपरितोषणे

मृदुल-मृदुल-वाणी-मुग्धमाधुर्यलीला,
तुदतु तुदतु नित्यं व्याप्तजाड्यान्धकारम्।
जयतु जयतु वाणी जन्मदुःखादिशून्या,
हरतु हरतु पापं पादपद्माश्रितानाम्।।
कलयतु कलकाव्ये कम्रवाणीविलासं,
श्रवणपुटनिपेयं स्वर्णवीणोर्मिलास्यम्।
सदय-हृदय-काश्यं शारदासुन्दरास्यं,
सकलसुजनवास्यं भारताख्यञ्च देशम्।।

अत्यन्त शुद्ध रहने वाली है। शुद्धि दो प्रकार की होती है। आन्तरिक शुद्धि एवं बाह्यशुद्धि । दूषित विचार आन्तरिक शुद्धि में बाधक है और निद्रा-आलस्य आदि बाह्य शुद्धि में बाधक है किन्तु माँ सरस्वती उक्त द्विप्रकारक दोषों

से निर्मुक्त है। अतः शुद्ध है। प्रबुद्ध है अर्थात् अत्यन्त चतुर है। देशकाल परिस्थितियों के अनुसार निर्णय लेने में सक्षम है। सभी से अनुबन्धित है अर्थात् ज्ञान के रूप में चौरासी लाख योनियों से उनका सम्बन्ध है । अत्यन्त कोमल है। अर्थात् निरभिमानी है। विशिष्ट विद्वानों से नमस्कृत है तथा जगद्विदित है। शास्त्र के मर्मज्ञों से ज्ञात है और सम्पूर्ण जगत् के आविर्भाव या अभिव्यक्ति के पूर्व विद्यमान रहने वाली है । इतने विशेषणों से विशिष्ट रहने पर भी सीधी-साधी रहने वाली है अर्थात् लोक में प्रचलित तड़क-भड़क से दूर रहने वाली है। ऐसी माँ सरस्वती को मैं निरन्तर प्रणाम करता हूँ।

सम्पूर्ण विश्व को अपने के ही रूप में अपनानेवाली, निर्मल पूज्य गुणों से विशिष्ट, सुप्रसिद्ध दिव्य चरित्रवाली, ज्ञानदात्री के रूप में ब्रह्माजी के द्वारा नियुक्त, देव गुरु से पूजित, विद्याके संरक्षक मूर्धन्य विद्वानों द्वारा सन्तुष्ट एवं जगत्प्रसिद्ध, माँ भारती सर्वत्र विजयी होकर विराजमान होती रहें ।

वीणा से विभूषित हाथवाली, सुस्पष्ट मनोहर स्वरूप वाली, निर्मलश्वेतवस्त्रवाली, सम्पूर्ण कामनाओं को देनेवाली दयान्वित हृदयवाली एवं प्रसिद्ध कमल के आसन पर विराजमान होकर अभयदानदेनेवाली और कमल के सदृश नेत्रवाली, निष्कलंक चरित्रवाली, सर्वव्यापिका वाणी को नमस्कार है।

अत्यन्त कोमल या विनम्र वाणी की निष्कपट एवं मनोहारी लीलाएँ, सम्पूर्ण जगत् में परिव्याप्त, आलस्यरूपी अन्धकार को निरन्तर नाश करते रहें और जन्म आदि दुःखों से रहित अर्थात् अजन्मा, वह वाणी सम्पूर्ण जगत् में सर्वोत्कृष्ट होकर भासित होती रहें एवं उनके चरण रूपी अरविन्दों को शरण लिए हुए भक्तों के समस्त पापों को हरण अर्थात् नाश करते रहें ।

गणनीय उत्कृष्ट कविताओं में, विशिष्ट वाणी की पावन लीलाओं का, वर्णन, सरस्वती के समुपासक निरन्तर वर्णन करें एवं उनके सुन्दर वीणा के तन्तुओं से निर्गत होनेवाले तरंगों के नृत्य को निरन्तर श्रवण करें और निर्मल अन्तःकरणों को भासित करने वाले माँ शारदा के मनोहर मुखमण्डल के सन्दर्भ में अपनी भावनाओं को अपनी-अपनी कविता में वर्णन करें एवं भारत नामक राष्ट्र, मात्र सज्जनों का निवास स्थान है इस आशय की अभिव्यक्ति अपनी कविताओं में अभिव्यंजित करें ।

शारदाकण्ठाभरणम्

(शारदास्तुतिः)

-:१:-

आम्नायेषु समेधिता प्रथितषट्शास्त्रेषु सिद्धान्तिता,
संगीते स्वरतत्परा च वितता विद्वद्भिरासेविता।
आस्ते शाङ्करिसन्नुताऽतिमहिता श्रीकान्तकान्तादृता,
तस्यै तन्त्राविशारदैः प्रणमिते! वाग्देवि! तुभ्यं नमः।।

-:२:-

लोकेस्मिन्निखिलैः सुरासुरगणैः स्वर्लोकदेवाधिपैः
पृथ्व्यां पूजितभूसुरैर्द्विजवरैर्विख्यातसिद्धाधिपैः।
अन्यैराश्रित-सेवकैर्मुनिवरै-र्मान्यैर्महा-मन्त्रिभिः,
सर्वैः सेवतिपादपद्मयुगला स्वाद् भारती भव्यदा।।

श्लों० सं० (१)

वेदों में अभिवर्णित, प्रसिद्ध, समस्त शास्त्रों में स्वीकृत, संगीत साधना में अथवा स्वरों के अभिव्यक्ति में तल्लीन सर्वव्यापक एवं विद्वानों द्वारा समुपासित, भगवान शंकर द्वारा संस्तुत एवं सभी के द्वारा पूजित विष्णु पत्नी लक्ष्मी जी द्वारा अभिनन्दित होकर रहनेवाली और तन्त्रशास्त्र में पारंगत मनीषी-महिर्षयों द्वारा नमस्कृत परोक्ष एवं प्रत्यक्ष भासित होनेवाली माँ शारदा! आपके लिए मेरा अनन्त नमन है।

श्लों० सं० (२)

इस लोक में रहनेवाले तथा देवताओं से एवं दानवों से तथा स्वर्ग के निवासी विशिष्ट देवताओं के अधिपतियों द्वारा अथवा इस धरातल पर पूजित द्विजश्रेष्ठ भूदेवताओं द्वारा एवं जगत्प्रसिद्ध सिद्धों द्वारा एवं माँ शारदा के छत्र छाया में पल्लवित सेवकों द्वारा, मुनियों एवं विशिष्ट पुरुषों द्वारा एवं प्रमुख महामन्त्रियों द्वारा पूजित पादपद्मवाली माँ भारती सर्वोत्कृष्ट सम्पदाओं को प्रदान करनेवाली हों ।

-:३:-

नित्याख्या निरवद्यनीतिनिपुणा निर्व्याजरागान्विता,
सौम्या सौम्यजनार्चिता शुभगुणैः सर्वत्र सम्पूजिता।
मातङ्गी महिमान्विता च महिता माङ्गल्यसूत्रान्विता,
सर्वान् रक्षतु शारदा सुमतिदा सर्वैः सदाऽऽराधिता।।

-:४:-

दिव्यैर्देवगणैः सदा सदमलैः सर्वार्थसंसाधकैः,
सिद्धैः शंसितसुप्रसिद्धचरितैः सिद्धान्तसारान्तगैः।
नित्यानित्यपदार्थभेदजनकैर्निस्सीमबोधान्वितैः,
सन्दीप्ता चिरभारती भवतु नो ज्ञानप्रदा भक्तिदा।।

श्लों० सं० (३)

नित्य कहे जानेवाली, निर्दुष्ट नीतिनिर्धारण में निपुण एवं बिना, हेतु के सब के प्रति अपना स्नेह बाटने वाली अत्यन्त सात्विक स्वभाव वाली, सात्विकवृत्ति वालों से अर्चित अपने उत्कृष्ट गुणों के कारण सर्वत्र पूजित, मतंग महर्षि के पुत्री के रूप में मान्यता प्राप्त, अनेक विशिष्ट महिलाओं से पूजित, माङ्गल्य सूत्र से समलंकृत सभी के द्वारा आराधित, अत्यन्त प्रसन्न रहने वाली माँ शारदा सब की रक्षा करें ।

श्लों० सं० (४)

विशिष्ट देवता समूहों से, निर्मल अन्तकरण वालों से, अपने अभीप्सित लक्ष्य को साधने में सर्वथा समर्थ व्यक्तियों से, सिद्धों से अभिनुत, निष्कलंक सुप्रसिद्ध चरित्र वालों से, सम्पूर्ण शास्त्रो के सारतत्त्व को जानने वालों से, नित्य एवं अनित्य रूपी पदार्थों के विभाजक ज्ञान से, परिपूर्ण एवं अगाध पाण्डित्य से परिप्लुत व्यक्तियों से अभिव्यञ्जित शाश्वत माँ भारती, हम सभी लोगों को भक्तियुक्त ज्ञान प्रदान करने वाली हो ।

-:५:-

या माता विधितो विरिञ्चिवनितेत्याख्यायते भारती,
यस्या वीक्षणमात्रतो जडमतिर्मान्यो भवत्यञ्जसा ।
सा सौन्दर्यसुधाम्बुधिः सुरवरैः सर्वत्र सम्पूज्यते,
तामादीप्तसरस्वतीं सुविदितां संश्रित्य मोदामहे।।

-:६:-

ब्राह्मीं ब्राह्मणदैवतां मतिमतां मूर्धन्यभूदेवतां,
पश्यन्तीत्यनुमध्यमेति च भिदा या वैखरीभासते।
तां वाणीं परदेवतां परिगतां दिव्यां परां दीप्तिदां,
वन्दे सत्कुलभूषिताञ्च ललितां वागीश्वरीं वत्सलाम्।।

श्लों० सं० (५)

माँ भारती किसी कल्प में विधिपूर्वक विवाहित ब्रह्माजी के पत्नी के रूप में स्वीकार किया जाता है । जिनकी अनुराग प्रपूर्ण दृष्टि मात्र से अशिक्षित जडमति भी तुरन्त प्रसिद्ध विद्वान् बन जाता है । वह लोकोत्तर सौन्दर्य के सागर के रूप में स्वीकृत माँ सरस्वती, विशिष्ट देवताओं द्वारा सर्वत्र पूजित होती है । इस प्रकार सभी के द्वारा पूजित या अभिनन्दित सुप्रसिद्ध माँ सरस्वती का आश्रय पाकर हमलोग अत्यन्त आनन्दित हैं ।

श्लों० सं० (६)

ब्रह्माजी से अनुबन्धित, ब्राह्मणों के प्रमुख देवता के रूप में स्वीकृत, बुद्धिमानों के सर्वोत्कृष्ट भूदेवता कहे जाने वाली, पश्यन्ती, मध्यमा तथा वैखरी के रूप में भासित होनेवाली, उस पर देवता वाणी को जो परिव्याप्त है दिव्य है सर्वोत्कृष्ट है और तेज को देनेवाली है । अपने कुल के गौरव को बढ़ाने वाली, अत्यन्त सुन्दर, वात्सल्य गुण विशिष्ट वागीश्वरी को नमस्कार है ।

-:७:-

काम्या कामितसर्वसौख्यनिचयं स्नेहेन वै सर्वदा,
दातुं या किल तत्पराऽतिललिता सर्वैर्नुता राजते।
तां त्रैलोक्यसुधामयीं सुविदितां शुभ्रां शुभाकाङ्क्षणीं,
मान्यां मौलिकमन्त्रतन्त्रसहितां मत्वा च सेवामहे ।।

-:८:-

या माता विबुधार्चिता विधिनुता विख्यातवागीश्वरी,
निर्लेपा निगमागमेषु बहुधा नित्येति संकीर्तिता।
तां वेधार्चितदीप्तदिव्यचरितां संश्रित्य सर्वात्मना,
ध्यात्वाऽभीप्सितसार्वदेशिकसुखं लब्ध्वा च मोदामहे।।

श्लों० सं० (७)

जो निरन्तर अपेक्षित सम्पूर्ण सुख समुदाय को सहज स्नेह से देने के लिए आतुर, अत्यन्त सुन्दर स्वरूप वाली होकर, सभी के द्वारा अभिनन्दित होकर विराजमान है उस चतुदर्श ब्राह्मण्डों को आनन्दित करने वाली, सर्वविदित, अत्यन्त निर्मल, सभी के अभ्युन्नति को चाहने वाली सर्वस्वीकृत एवं अपने द्वारा सिद्ध किये गये मन्त्र तथा तन्त्रों से विशिष्ट, हमलोग उस पराम्बा माँ सरस्वती की सेवा करते हैं ।

श्लों० सं० (८)

माँ सरस्वती देवताओं द्वारा आराधित है । ब्रह्माजी द्वारा अभिनन्दित है । वागीश्वरी के रूप में विख्यात है । निस्पृह है । निगम एवं आगम शास्त्रों में सर्वत्र नित्यमान कर संस्तुत माँ भारती ब्रह्माजी द्वारा आराधित, सुस्पष्ट अलौकिक असदृश चरित्रवाली को अपना सर्वस्व समझकर उनका आश्रय प्राप्तकर, निरन्तर उनका स्मरण करते हुए अपेक्षित सर्वत्र उपलब्ध होने वाले सम्पूर्ण सुखों को प्राप्तकर आनन्दित होते हैं ।

-:९:-

कश्चिल्लौकिक-सौख्यलुब्धमनसा लक्ष्मीं सदाऽसेवते,
कश्चित्सुस्थिरशक्तताभिलषन् शक्तिं सदा-मञ्चते।
भो मातर्वयमीप्सितार्थकलने वाणीं स्थिरां श्रीयुतां,
सर्वैः सेवितपादपद्मयुगलां सर्वात्मनेहामहे ।।

-:१०:-

कल्याणी कलिकालदोषरहिता कामेश्वरी कान्तिदा,
नद्यामादिसरस्वतीति कथिता नव्या निराकाङ्क्षिणी।
निर्णीता निगमोक्तभावसहिता नित्याप्तभावैर्युता,
कुर्यान्नः कुशलान् कुलीनवनिता कौशाग्र्यबुद्धिप्रदा ।।

श्लों० सं० (९)

माँ भारती ! कुछ लोग लोक में उपलब्ध होनेवाले सम्पूर्ण सुख-सुविधाओं की कामना से लक्ष्मीजी की आराधना करते हैं और कुछ लोग सशक्त रहने की अपेक्षा से शक्तिस्वरूपिणी माँ भगवती भवानी की उपासना करते हैं किन्तु हम लोग सम्पूर्ण कामनाओं की सम्प्राप्ति के निमित्त, सभी सुधीजनों द्वारा सेवित पादपद्मवाली माँ सरस्वती को ही सम्पूर्ण सम्पत् प्रदायिका मानकर तथा सुस्थिर देवता मानकर त्रिकरण पूर्वक उनकी कृपा की कामना करते हैं ।

श्लों० सं० (१०)

सम्पूर्ण जगत को कल्याण करने वाली, कलिकाल में सहजतया उपलब्ध होनेवाले दोषों से रहित, कामनाओं को प्रदान करनेवाली एवं सर्वाकर्षक आभा प्रदान करने वाली, नदियों में सर्वप्रथम नदी के रूप में विख्यात, सरस्वती के रूप में अभिहित तथा नित्य निर्मल होकर, निराकांक्ष स्वरूपिणी होकर, सभी के द्वारा स्वीकृत होकर, निगमों में कथित सद्गुणों से विशिष्ट होकर, निस्वार्थ भावों से परिपूर्ण, वह सुप्रसिद्ध सम्भ्रान्तकुल की देवता सरस्वती सुसूक्ष्म बुद्धि की प्रदायिका होकर, हम लोगों को अत्यन्त कुशल बनाने की कृपा करें ।

-:११:-

शास्त्रार्थे सफला सदा सदमला सारस्वती शाश्वती,
सम्पूर्णा सकलालया समरसा सर्वैर्नुता शोभते।
सा सामान्तगिरा सदेतिगमिता सर्वार्थविद्याप्रदा,
भूयान्नो भवभीतिहा भगवती भूमोज्ज्वला भारती।।

-:१२:-

या यज्ञैरनुसेवितास्ति जननी या मन्त्रतन्त्रादिभि-
र्या मुग्धा महिमान्विता च महिता माधुर्यभावैर्युता।
या सर्वत्र सदा सुधीन्द्रसदने सम्पूजिता सेविता,
सा साध्वी सकलाश्रिताननुपमा सर्वात्मना रक्षतात्।।

श्लों० सं० (११)

सम्पूर्ण शास्त्रार्थों में अग्रणी रहने वाली, सर्वत्र विजयी होने वाली, निरन्तर शुद्ध रहने वाली, शास्त्र चर्चा में समय को सार्थक करने वाली, सत्यस्वरूपिणी, सर्वव्यापिका, सम्पूर्ण क्षेत्रों में विराजमान, सर्वत्र समान रूप से अवभासित, सभी द्वारा अभिनन्दित होकर संशोभित हो रही है । माँ सरस्वती सामवेद के अन्तिम भागों में सत्स्वरूपिणी के रूप में ज्ञात हैं एवं सभी के द्वारा अपेक्षित सभी विद्याओं को अनुग्रह करने वाली है। अलौकिक सुखों से परिप्लुत माँ भगवती भारती, हम सभी के भवभीति की निवारिका हों ।

श्लों० सं० (१२)

माँ सरस्वती यज्ञ-यागादियों द्वारा परिपूजित है । मन्त्रतन्त्रादियों से अनुशीलित है । अत्यन्त सरल है । महिमा मण्डित है । सभी से आराधित है । मनोहारी गुणों से युक्त होने से सर्वविदित है। जो निरन्तर विद्वज्जनों के आवासों में सर्वत्र पूजित एवं शोभित है । ऐसी सर्वगुण सम्पन्ना एवं सुशीला माँ भगवती, अपने आश्रय में रहने वाले सभी सेवकों को हर प्रकार से रक्षा करें ।

-:१३:-

या सूक्तैः सुजनाश्रितोपनिगमैः शण्डिल्यसूत्रादिभि-
र्विस्रब्धैर्विदितैर्विनम्रचरितैर्या सन्नुता स्मारिता ।
गम्यागम्यगुणान्विता गुणवती गीर्वाणवृन्दावृता,
सा भूयात् सकलेप्सिता सुविदिता सौम्या स्थिरा श्रीप्रदा।।

-:१४:-

ये त्वत् सुस्थिरशान्तिदायकपदं विस्मृत्य दोषादिना,
सद्यः सम्भवसौख्यमोहवशतो वामादिमार्गे गताः।
तेऽपि श्रीयुतपादपद्ममलं संश्रित्य सर्वैर्नुतं,
शोभन्ते किल देवतुल्यविभवं लब्ध्वाऽत्र तुष्टिं गताः।।

श्लों० सं० (१३)

माँ सरस्वती सूक्तों द्वारा एवं सज्जनों द्वारा अनुशीलित निगमों के द्वारा तथा शाण्डिल्य आदि सूत्रों के द्वारा और निश्चित होकर रहने वाले सुप्रसिद्ध निरभिमानी निर्मल चरित्र वालों से अभिनन्दित एवं स्मारित है । सुस्पष्ट एवं अस्पष्ट गुणों से विशिष्ट एवं गणनीय शुभदगुणों से विराजित, दिव्य देवताओं द्वारा परिवेष्टित, सभी द्वारा अपेक्षित, सुविज्ञात, सात्विक एवं निश्चलभाव वाली, माँ सरस्वती, हम सभी के ऐश्वर्य प्रदायिका हों ।

श्लों० सं० (१४)

माँ जिन लोगों ने संसर्ग जनित दोषों से भ्रमित होकर, आपके सुस्थिर शान्तिप्रदायक पदपद्मों को छोड़कर, तत्काल प्राप्त होनेवाले सुख-सुविधाओं के मोह के वशवर्ती होकर क्लिष्ट एवं शिष्टों द्वारा निराकृत वामादि मार्गों में प्रविष्ट हैं, वे भी उस अस्थिर सुखप्रदायक मार्ग को छोड़कर, समस्त ऐश्वर्यो से विशिष्ट आपके चरण कमलों के समुपासक बनकर, सभी द्वारा संस्तुत दिव्यदेवताओं के अनुरूप सम्पदा को प्राप्त होकर, सन्तुष्ट होकर, इस धराधाम पर विराजमान होते हैं ।

-:१५:-

सम्पूज्या सुमुखी प्रभातसमये वीणां सुरत्नाङ्क्तिां,
नीत्वा रागरसान्वितैः स्वरचितैः पद्यैर्विभिन्नात्मकैः।
प्रेम्णा लोकहितैषिणी हिततमैर्या वादयन्ती नवैस्-
तुष्टाऽऽस्ते शुभलक्षणा शुभकरी तामर्चयामो गिरम्।।

-:१६:-

क्लींकारान्वितकालिकादिसहिता क्लेशापहन्त्री सतां,
वेदैर्या विदिताक्षरा विगतभीः प्रत्यूषकालेऽनिशम्।
सिद्धैः श्लाघितशारदा सुरुचिरैर्विद्याधरैर्वेष्टिता,
सा गेहाद्बहिरागताऽस्ति सुषमा पायात् सदा सेवकान्।।

श्लों० सं० (१५)

पूजनीया वह प्रसन्नानना, ब्रह्म मुहूर्त में दिव्यरत्नों से समलंकृत अपनी वीणा को अपने हाथ में लेकर, संगीत शास्त्र में निरूपित रागों एवं साहित्य में वर्णित रसों से विशिष्ट, अपने द्वारा आरचित विभिन्न पद्यों के आधार पर, सहज स्नेह से सम्पूर्ण जगत् की हितैषिणी होकर, सबके हितकर नये-नये गीतों को अभिव्यजित करते हुई, जो सन्तुष्ट है । ऐसी शुभलक्षणों से विशिष्ट शुभदकामना वाली उस सरस्वती की हमलोग आराधना करते हैं ।

श्लों० सं० (१६)

क्लीं कार से ज्ञापित किये जानेवाली कालिका देवी आदियों के साथ विराजमान माँ शारदा, सज्जनों के सम्पूर्ण कष्टों को नाश करने वाली है। और वेदों में जिनके अक्षर स्वरूप अभिवर्णित है । सभी प्रकार के भय-भीतियों से रहित होकर निरन्तर प्रातःकाल अपने निवास से बाहर आनेवाली, सिद्धों से सन्स्तुत माँ शारदा, सुन्दर विद्याधरों से परिवृत होकर, सौन्दर्य सिन्धु के रूप में भासित हो रही है । वह बाहर आई हुई देवता अपने सभी सेवकों को निरन्तर रक्षा करें ।

-:१७:-

या त्रैलोक्यनुता त्रिलोकजननी शान्तिप्रदा शारदा,
सर्वाकर्षकसौम्यभावकलिता सर्वैः सदा वन्दिता ।
या लोकोत्तरमञ्जुमञ्जुलगिरा स्निग्धा रसस्यन्दिनी,
सा नः स्यात् स्थिरदेवता सुखकरी नित्या नितान्तोज्ज्वला।।

-:१८:-

लावण्यान्वितकान्तिकोटिकिरणैर्देदीप्यमानाऽनिशं,
शिष्टैःश्लाघितशारदाऽस्ति विमला विज्ञानविद्याप्रदा।
भारत्याः प्रियपुत्रकाः सकलदिक्साम्राज्यसंस्थापने,
दक्षाः सन्ति च भूतले क्षितिभुजो विख्यातिमातन्वते।।

श्लों० सं० (१७)

जो सम्पूर्ण लोकों से अभिनन्दित है और समस्त ब्रह्माण्डो की जननी है । शान्ति को प्रदान करने वाली है । सभी को आह्लादित करने वाली, अत्यन्त स्निग्धभावों से संवलित है । सभी के द्वारा सर्वत्र नमस्कृत है और अनुपम स्नेहिल एवं प्रभावोत्पादक वाणी से युक्त होकर, अथवा अनुराग प्रपूर्ण वाणी से युक्त होकर, अमृत से अभिसिंचित करने वाली है । वह नित्य स्वरूपिणी एवं निश्चल रहने वाली तथा अत्यन्त उज्जवल माँ शारदा, हम लोगों को निरन्तर सुख प्रदायिका हो ।

श्लों० सं० (१८)

सौन्दर्य के करोड़ों किरणों से जिनके मुखमण्डल अत्यन्त शोभान्वित है और भद्रपुरुषों के द्वारा अभिनन्दित, माँ शारदा, नितान्त निर्मल एवं लौकिक एवं अलौकिक विज्ञानरूपी विद्या को प्रदान करने वाली है । जिनकी अनुपम कृपा से भारतीय क्षत्रपों ने सम्पूर्ण दिशाओं में अपना आधिपत्य स्थापित करने में अत्यन्त समर्थ हैं एवं सम्पूर्ण भूमण्डल में अपने गौरव का विस्तार करने में भी कुशल हैं।

-:१९:-

या वाणी खलु भूसुरैरधिगता नित्यार्चिता चेन्मुदा,
सा स्तुत्या सुरसेविता वितनुते तत्कीर्तिवैशिष्ट्यताम्।
यो भक्त्या शुभदान्वितां श्रुतिगतां संश्रित्य सर्वात्मना,
ध्यायन्नस्ति सदा स्वकीयसदने किं किं न सोऽवाप्नुते।।

-:२०:-

भीतिभृद् यः सार्वत्रिकभव्यभूतिकलने भूरिश्रमाद् त्रस्यते,
दिष्ट्याऽसौ मुहुरिच्छया सुरनुतां सारस्वतीं सर्वगाम्।
प्रीतिप्रेरितसेवनेन यदि सा सम्पूज्यते शाश्वतीं,
सोऽपि-प्राञ्जल-सार्वभौमपदवीं सम्प्राप्य संराजते।।

श्लों० सं० (१९)

विप्रों के द्वारा अधिगत सरस्वती उन्हीं लोगों द्वारा अत्यन्त उत्साह के साथ वह निरन्तर यदि आराधित होती है तो, देवताओं द्वारा सेवित एवं अभिनन्दित सरस्वती उन लोगों की ख्याति की विशिष्टता को सर्वत्र परिव्याप्त कर देती है । जो लोग अत्यन्त भक्ति के साथ अपने-अपने निवास स्थानों में शुभगुणों से विशिष्ट एवं श्रुति के द्वारा विज्ञात, उस देवी को अपना सर्वस्व मानकर ध्यान करते हैं उन लोग इस दुनिया में क्या-क्या प्राप्त नहीं कर सकेंगे ?

श्लों० सं० (२०)

जो सर्वत्र परिव्याप्त विशिष्ट ऐश्वर्य को प्राप्त करने के निमित्त अपेक्षित परिश्रम से त्रस्त हो जाता है । फिर भी पूर्व जन्म के संस्कारों से प्रेरित होकर सर्वत्र विराजमान, सुरों से संस्तुत विद्याप्रदायिका माँ शारदा की सेवा के इच्छुक होकर, इस शाश्वत सरस्वती की आराधना करता है तो, उस व्यक्ति के निष्ठाप्रपूर्ण सेवा से माँ भगवती सन्तुष्ट हो जाने पर, वह भी मनोज्ञ एवं सर्वोत्कृष्ट पद को प्राप्त होकर, देदीप्यमान हो जाता है ।

-:२१:-

नत्वा नित्यनुतां नवीनसुभगां नित्येप्सितां निर्मलां,
नित्यानन्दयुतां स्वकीयनिलये नित्याप्तलोकैर्नुताम्।
नीतिज्ञैर्नियतार्चितां निखिलदां निस्सीमरागान्वितां,
सम्पूज्याऽत्र सदा विशुद्धमनसा किं किं न संसाध्यते।।

-:२२:-

सृष्ट्यादौ शुभलक्षणा सुनयना सर्वैर्नुता शारदा,
ब्रह्माण्डादिकसर्जने सहचरी स्वायंभुवा काङ्क्षिता।
या सर्वत्र विराजिता विमलहृद्देशेऽपि या संस्थिता,
सा शुभ्रा विधिसुन्दरी शुभकरी भूयात् सदा श्रीकरी।।

श्लों० सं० (२१)

निरन्तर संस्तुत, नवीन अलौकिक आभा से विशिष्ट, सभी द्वारा अपेक्षित, अत्यन्त निर्मल, नित्य आनन्द से परिप्लुत, नित्य आप्तों से अभिनन्दित, नीतिज्ञों से नियमपूर्वक पूजित, सम्पूर्ण अपेक्षाओं को प्रदान करने वाली एवं अपार सहज स्नेह से युक्त माँ सरस्वती को अपने-अपने निवास स्थानों में अत्यन्त आसक्ति के साथ निर्मल चित्त से जो आराधना करते हैं वह व्यक्ति क्या-क्या नहीं प्राप्त कर सकेंगे ?

श्लों० सं० (२२)

सृष्टि के आरम्भ में सम्पूर्ण शुभ लक्षणों से लक्षित एवं मनोहर नेत्र वाली तथा सभी के द्वारा कीर्तित, माँ शारदा ब्रह्माजी द्वारा सृष्टि की संरचना में सहयोगी के रूप में अपेक्षित होकर, सर्वत्र विराजित है एवं निर्मल अन्तःकरणों में भी वह देदीप्यमान होकर स्थित है । उपर्युक्त गुणगणों से विशिष्ट वह माँ, ब्रह्मा जी की प्रेयसी अत्यन्त शुभद सुख को प्रदान करने वाली माँ शारदा, निरन्तर ऐश्वर्य प्रदायिका हों ।

-:२३:-

या गेहे हितकारिणी विपदि नो निर्व्याजनिस्तारिणी,
वेदान्तेषु विचारिता सकलसत्तीर्थेषु या राजते।
शान्ता शाश्वतवेदसारसहिता श्रुत्यन्तरे भासते,
सा साध्वी सुमनोहरा सुमनसां भूयात् सदा श्रेयसे।।

-:२४:-

या गीर्वाणगिरा सदैव विनुता भव्या शुभा भारती,
विज्ञैरर्चितविग्रहा सदमलैरज्ञैः श्रिताऽऽराधिता।
या साऽऽपामरवाञ्छिता विधिगता विद्याधिपैः पूजिता,
शश्वत् कामितवस्तुदा भवतु नो सत्यार्थसम्पत्-प्रदा।।

श्लों० सं० (२३)

अपने निवास स्थान में सबको हित करने वाली एवं विपत्ति के सन्दर्भ में बिना निमित्त के उस विपत्ति से पार करने वाली, वेदान्तों में जो सर्वत्र चर्चित है और सम्पूर्ण प्रसिद्धतीर्थों में जो देदीप्यमान है । वह प्रशान्त स्वरूपिणी माँ शारदा, शाश्वत वेदों के सारतत्त्व से संवलित होकर, विभिन्न वेदों में भी भासित हो रही है । सुशीला एवं मनोहारी स्वरूप वाली माँ सरस्वती, निर्मल अन्तःकरण वालों को निरन्तर ऐश्वर्य प्रदायिका हों ।

श्लों० सं० (२४)

जो वैदिक मन्त्रों के द्वारा सर्वत्र संस्तुत है, एवं अलौकिक तथा शुभद गुणों से विशिष्ट है । माँ भारती, सदा सुधी जनों से पूजित मूर्ति है । नितान्त निर्मल अन्तःकरण वाले एवं सामान्य जनता से भी वह आराधित है और विज्ञ एवं अज्ञों से अपेक्षित है । शास्त्रों के द्वारा अधिगत है तथा मूर्धन्य विद्वानों द्वारा अर्चित है । अपने आश्रय में आश्रित व्यक्तियों द्वारा अपेक्षित वस्तुओं को प्रदान करने वाली माँ भारती, हम लोगों को शाश्वत ऐश्वर्य प्रदान करने वाली हों ।

-:२५:-

विप्रैः सन्नुतभारती भरतभूर्वैशिष्ट्यसंख्यापने,
पर्याप्येति मुदा स्तुताऽस्ति विमला श्लोकैः सदा ह्यर्चिता,
विद्वद्भिर्विमलैर्महामुनिवरैर्या स्वीकृता सत्कृता,
सा सर्वत्र सुधीजनैरभिनुता पायात् सुतान् सर्वदा।।

-:२६:-

ये भक्ताः कृतघोरतीव्रतपसा सम्प्राप्य लक्ष्मीकृपां,
तस्या वाञ्छितदिव्यभोगमतुलं लब्ध्वा प्रभूतं धनम्।
लोभात् सार्थकदानधर्मरहितात् त्यक्त्वाऽत्र सर्वं स्वकं,
खिद्यन्ते यमराजरम्यसदने किं तैः स्थिरं साधितम्।।

श्लों० सं० (२५)

भूसुरों द्वारा आधारित माँ शारदा, अपने भरत भूमि के विशिष्टता के प्रतिपादन में पर्याप्त है एवं नाना प्रकार के श्लोकों के द्वारा आराधित है । मूर्धन्य विद्वानों एवं महान तपस्वियों द्वारा स्वीकृत एवं अभिनन्दित तथा सुधी जनों द्वारा सर्वत्र संस्तुत माँ भारती, अपने सभी पुत्रों को निरन्तर रक्षा करें ।

श्लों० सं० (२६)

जो भक्त अत्यन्त कठिन एवं तीव्र तप के द्वारा लक्ष्मी जी की कृपा को प्राप्त करके, उस माँ लक्ष्मी के द्वारा प्रदत्त सम्पूर्ण असदृश दिव्य भोगों को एवं प्रचुर धन राशि को प्राप्त करने के उपरान्त भी प्रलोभ गुण के कारण शुभद फल प्रदायक दान-धर्मों से विरत होकर, देहावसान के अवसर पर अपने सर्वस्व को यही छोड़कर, खिन्न होकर, उस यमराज के सुन्दर सदन में प्रविष्ट हो जाते हैं । उन लोगों द्वारा कौन सा शाश्वत पुण्य अर्जित किया गया है ?

-:२७:-

अन्ये चात्र विपन्नदैन्यवशगाः सर्वं सहा सर्वतः,
श्रद्धासंयुतभक्तिभावभरिता नित्यां शुभां शारदाम्।
आराध्याप्यविधानतस्तव कृपां संवीक्ष्य नित्येप्सितां,
भुक्त्वाताननुयावदत्र सुलभान् गच्छंन्ति ते त्वल्पदम्।।

-:२८:-

ये शिष्टाः सुधियः सुरासुरगणैः सम्पूजितां शारदां,
नित्यां निर्मलवेषभूषसहितां निर्मत्सरैर्वेष्टिताम्।
निर्व्याजेन नताश्रितान्ननुदिनं नव्यार्थदाने रतां,
श्रुत्वा भूगतदेवतां भुविनुतां तामेव यान्त्यन्वयम्।।

श्लों० सं० (२७)

इसके अतिरिक्त नाना प्रकार के विपत्तियों को झेलते हुए भी, अत्यन्त दैन्यभरा जीवन यापन करते हुए, सबकुछ सहकर श्रद्धाप्रपूर्ण भक्तिभाव से आपका आश्रय प्राप्त कर, नित्य स्वरूपिणी शुभलक्षणों से विशिष्ट माँ शारदा की आराधना करते हुए, सभी के द्वारा अपेक्षित, आपके दर्शन करते हुए, विधिपूर्वक आपके कृपा पात्र होकर, आपके अनुग्रह से उपलब्ध सम्पूर्ण सुखों के उपभोग के उपरान्त आपके नित्यनिवास में पहुँच जाते हैं ।

श्लों० सं० (२८)

बुद्धिमान एवं सदाचार परायण देव-दानवगणों से परिपूजित, शाश्वत एवं अत्यन्त सरल वेषभूषा से विशिष्ट शुभद संस्कारवालों से परिवृत, विनम्र होकर आपके छत्रछाया में रहनेवालों को बिना हेतु के नित्य नई वस्तुओं को प्रदान करने वाली, धराधाम पर अभिव्यक्त, सर्वलोक सन्नुत शारदा के बारे में सुनकर और आप ही को प्राप्त होकर, निरन्तर आप ही के पास रह जाते हैं ।

-:२९:-

भो मातः श्रुतमाप्तशिष्टवचनैर्यत्तावकीं सत्कृपां,
ये प्राप्स्यन्ति नरा निरापदपदामेकेन वा जन्मना।
सा किं बन्धपदा सदा जनिगतानाश्रित्य जन्मान्तरे,
यातीत्यत्र सदानृतं न भजते किं वा सदा सूनृतम्।।

-:३०:-

दृष्टं सत्कुलशिष्यवृन्दलसिते गुर्वन्तिके चाश्रमे,
बोध्यं पूज्यगुरोः पवित्रसविधे संश्रूयमाणे गणे।
कोप्येकः किल धीविशेषसहितं श्रुत्वैकधा विन्दते,
तज्ज्ञानं किमु तावकीनजनितं संस्कारसंज्ञापकम्।।

श्लों० सं० (२९)

माँ शारदा निस्वार्थ एवं सदाचार सम्पन्न महानुभावों से सुना गया है कि जो लोग आपदाओं से रहित आपकी शाश्वत कृपा को जीवन में प्राप्त कर लेते हैं । सभी के द्वारा संस्तुत आप की यह सत्कृपा इसी जीवन में प्राप्त कर लेते हैं और सभी के द्वारा संस्तुत आपकी यह सत्कृपा जन्म जन्मों तक उन लोगों को साथ देता है ऐसा सुना गया है। क्या यह कथन असत्य तो नहीं है ? अथवा उनलोगों का यह कथन सर्वथा सत्य ही है ?

श्लों० सं० (३०)

माँ देखा गया है कि संस्कारयुक्त शिष्यवृन्दों से समलंकृत गुरुकुल रूपी आश्रम में, बोधक परमपूज्य गुरुजी के सान्निध्य में श्रुवण करने वाले उन शिष्यों में कोई एक शिष्य विगत जन्म में समुपार्जित विलक्षण बुद्धि के कारण, एक बार श्रवण करने मात्र से ही धारण कर लेते हैं । उस शिष्य का यह विशिष्ट ज्ञान, आप की ही कृपा से समुपलब्ध जन्मान्तर संस्कार के ज्ञापक नहीं है ?

-:३१:-

ज्ञानं तादृशमस्ति वा जनियुतं नास्तीति वा शङ्कते,
नित्याप्तैर्निखिलैर्विशुद्धचरितैर्विख्यातविद्वद्वरैः।
दृष्टान्तेन निबोधिते सदयहृद्व्यासादिना धीमता,
मन्येऽहं महिमातिशायि विपुलं मातुः कृपासम्भवम्।।

-:३२:-

लब्ध्वा लौकिकतारतम्यरहितं व्यक्तं महद्वैभवं,
किं ते त्वां सरसातिदिव्यचरितां विस्मृत्य देवान्तरम्।
लोके सम्प्रति चाकचिक्यलसितं संविभ्रमासूचकं,
संवीक्ष्याऽत्र रमाविलासजनितं यास्यन्ति किं नश्वरम्।।

श्लों० सं० (३१)

जन्म जन्मों तक अनुगत रहने वाला ज्ञान है या नहीं, इस प्रकार सन्देह किये जाने पर नित्य आप्तों से, सन्तों से एवं स्तुत्य चरित्रवालों से और जगत्प्रसिद्ध मूर्धन्य विद्वानों द्वारा संस्तुत उदार चरित सहृदय एवं विलक्षण बुद्धि के धनी वेदव्यास जी के दृष्टान्त से समझाने पर, मान लेते हैं कि सर्वोत्कृष्टमहिमा मण्डित आपकी विशिष्ट कृपा से सब कुछ सम्भव है ।

श्लों० सं० (३२)

आपकी ही कृपा से सर्वोत्कृष्ट एवं सुस्पष्ट सम्पत्ति को प्राप्त करने के उपरान्त, अत्यन्त कोमल एवं दिव्यचरित्र वाली आपको छोड़कर या आपको भूलकर, इस समय लोक में नाना प्रकार के भ्रान्ति जनक देदीप्यमान माँ लक्ष्मी जी की कृपा से चकाचौन्द भासित होने वाले उस नश्वर सम्पदा को देखकर क्या उसको प्राप्त करनी की चेष्टा करेंगे ?

-:३३:-

सिद्धैः स्वीकृतसाक्षरा चिररुचिर्निर्भ्रान्तलोकैर्नुता,
शास्त्रज्ञैर्बहुधार्चिता विमलसत्कार्येषु या कीर्तिता।
विज्ञाता विनयान्विता सकलसद्विद्याधरैर्वेष्टिता,
सा नः श्रीयुतदेवता शिवनुता दद्याद्धियं सात्त्विकीम्।।

-:३४:-

श्रुत्वा तत्सुरलोकवासिसुलभं सौख्यं सुरैः काङ्क्षितम्,
यज्ञैर्वा श्रुतिसम्मतैर्बहुविधैरभ्यर्च्य भूभारतीम्।
प्राप्याऽलौकिकसारसंभृतयुतामास्वाद्यकालान्तरे,
तेऽत्रागत्य तदानुभुक्तविषये ज्ञास्यन्ति तद्व्यर्थताम्।।

श्लों० सं० (३३)

सिद्ध महानुभावों के द्वारा स्वीकृत अक्षर स्वरूपिणी, शाश्वत सुषमा, सुनिश्चित ज्ञानवालों से संस्तुत, शास्त्रज्ञों के द्वारा नाना प्रकार से सम्पूजित, शास्त्र सम्मत सत्कार्यों के सन्दर्भो में अभिनन्दित, सर्वविदित एवं विनयगुण सम्पन्न, सम्पूर्ण-स्तुत्य विद्याधरों से परिवेष्टित, वह ऐश्वर्य विशिष्य देवता के रूप में भगवान शिव के द्वारा संस्तुत माँ शारदा, हमलागों को सात्विक एवं शाश्वत बुद्धि को प्रदान करें ।

श्लों० सं० (३४)

माँ भारती ! देवताओं से अपेक्षित और देवलोक में प्राप्त होनेवाले सुखों को, शास्त्र सम्मत अनेक प्रकार के यज्ञों के द्वारा और आपकी आराधना मूलक अलौकिक आनन्द से युक्त उन सभी सुखों को प्राप्तकर, उन सुखों के उपभोग के उपरान्त पुनः इस लोक में आकर, आस्वादित उन सुखों के निस्सारता से अवगत हो जाते हैं ।

-:३५:-

यद् वा लौकिकसौख्यजालमखिलं मायामयं दुःखदं,
ये वाञ्छन्ति जनाः सदा क्षितितले लोकान्तरे संस्थितम्।
तत्सर्वं परकीयभावकलितं विक्षिप्तचित्तैर्वृतं,
सत्यं स्वीयसुखं सदा श्रुतिशतैर्विज्ञापितं बुद्ध्यताम्।।

-:३६:-

या श्रुत्यर्थनिरूपणेऽतिनिपुणा या सुस्थिरा भारती,
तां विस्मृत्य महीतले मुहुरहो संसारसंतारणे।
अन्या नास्ति कृपाकटाक्षलसिता वैविध्यलोकान्तरे,
तस्मात् सा परदेवता प्रियजनैः सर्वैः सदाऽऽराध्यते।।

श्लों० सं० (३५)

इस लोक में जो भी लौकिक सुख समृद्धियाँ है वे सब दुःख देने वाले एवं भ्रान्ति जनित हैं । जो लोग इस लोक या परलोक में उपलब्ध होने वाले उन सुखों की कामना करते हैं वे सभी अपने, विक्षिप्त चित्तवृत्तियों के कारण अथवा उन सुखों को अपने से भिन्न मानने के कारण उन सुखों की अभिलाषा करते हैं किन्तु जो भी सुखस्वरूप प्रतीत हो रहा है, वे सब अपने ही स्वरूपात्मक सुख है। यह कथन सत्य है एवं सैकड़ों श्रुतियों के द्वारा समर्थित समझ लेना चाहिए ।

श्लों० सं० (३६)

माँ भारती, श्रुति के आशय को अभिव्यक्त करने में अत्यन्त कुशल है और उस स्थिर देवता को छोड़कर या भूलकर इस संसार सागर से पार कराने वाले और कोई नहीं है । नानाप्रकार के विविधता से विशिष्ट इस लोक में कृपाकटाक्ष से शोभित होने वाली अन्य कोई देवता नहीं है । अतः वह पर देवता, अपने सभी प्रियजनों से सर्वत्र पूजित होती है ।

-:३७:-

सूक्ष्मांशेन विलासिनी सकलहृद्देशेषु या भासिनी,
शुभ्रा शुभ्रतमा सिता समरसा सर्वत्र या भ्राजते।
तां संसेव्यतमां विहाय रुचिरामन्याँश्च यः सेवते,
सा सेवा हितकारिणी भवति किं सिद्धार्थसंसाधने।।

-:३८:-

मान्या मूर्ध्नि विलासिनी मतिमतां मातङ्गधीशोभिनी,
भव्या सा भुवनेश्वरी भगवती वक्त्राम्बुजे वासिनी।
यद्वा सा महितेश्वरी सदमला सत्यार्थसंकाशिनी,
सा सर्वत्र विलासिनी भवतु नः सर्वार्थसंभासिनी।।

श्लों० सं० (३७)

अपने सूक्ष्मांश से अभिव्यक्त अपने वास्तविक चित्स्वरूप से शोभित हाने वाली एवं सम्पूर्ण जीवों के अन्तःस्थली में निवास करने वाली माँ भारती अत्यन्त शुभ्र एवं उज्ज्वल होकर सर्वत्र समान रूप से भासित हो रही है । सर्वदा एवं सर्वप्रथम सेवनीय उस सौन्दर्य सिन्धु को छोड़कर, जो अन्य देवताओं की सेवा करते हैं, वह अन्य देवताओं को की गई सेवा, अलौकिक अथवा पारलौकिक सुख के संसाधन में क्या हितकारिणी हो सकती है ?

श्लों० सं० (३८)

जो सर्वज्ञ पुरूषों के सहस्त्रार में क्रीडा करने वाली है और मतंग महर्षि के अनःकरण को या बुद्धि को शोभित करने वाली है । वह अलौकिक परमेश्वरी माँ भगवती मुखारविन्दों में भी निवास करती है और वह सम्पूर्ण बह्माण्डों को संचालित करने वाली, सर्वत्र समान रूप से भासित होने वाली सभी वस्तुओं को प्रकाशित करने वाली है । सभी स्थानों पर विराजमान वह पर देवता हम लोगों को सत्यार्थ प्रकाशित करने वाली हों ।

-:३९:-

नम्रा नादकलान्विता निरुपमा या निर्विवादा सतां,
नित्या सा निरवद्यशास्त्रविदिता नित्यार्चिता निर्मला।
या काम्या किल शारदा सुविदिता सारस्वतैः सेविता,
सा साध्वी सुजनेप्सिता भवतु नः सौम्या सदा शान्तिदा।।

-:४०:-

ये संस्कारवशात् सदाऽत्र हृदये देहेन्द्रियादावहो,
रूपं वा प्रतिभासमानमनिशं सत्यात्मकं मन्वते।
आजन्मान्तर - लब्धदोषजनिता - दज्ञानमूलास्पदं,
तावन्नम्ब नमुञ्चतीदमखिलं यावन्न संबोध्यसे।।

श्लों० सं० (३९)

अत्यन्त विनम्र रहने वाली, नाद एवं कला से विशिष्ट, होकर असदृश है । वह सज्जनों की दृष्टि में निर्विवाद है । निरन्तर सभी से पूजित और दोषरहित, शाश्वत, निर्दुष्ट शास्त्रों से सुविज्ञात, सभी के द्वारा अभिलाषित, सारस्वत ब्राह्मणों से सेवित, सुधी जनों से वांछित, सुप्रसिद्ध सुशीला माँ शारदा, हम लोगों को निरन्तर शान्ति प्रदायिका हो ।

श्लों० सं० (४०)

माँ पूर्वोपार्जित सांसारिक संस्कारों के कारण निरन्तर यहाँ पर भासित होने वाले रूपों को अथवा देह एवं इन्द्रियों को सत्य समझते हैं। यह भ्रान्तिजनित है । जन्मान्तरों से अनुगत अज्ञान के कारण है । जब तक आप इस अज्ञान के निवृत्ति के निमित्त ज्ञान का उपदेश नहीं देंगे तब तक यह अज्ञान अनायास हटने वाला नहीं है । अतः वास्तविक ज्ञान के निमित्त आपके उपदेश की नितान्त आवश्यकता है ।

-:४१:-

भ्रान्त्या कल्पितभेदभावमखिलं सम्मोहबुद्ध्येरितं,
तावत्तत्स्थिरता तदीयदृढता यावन्न सम्बुद्ध्यते।
पूर्वोपार्जित-पुण्य-कर्मवशतस्त्वामर्चयन्तो गिरम्,
भूयस्त्वत्कृपया चिरादनुगतं तत्सर्वमुत्सार्यते।।

-:४२:-

कम्रां तां कलिकालकल्पलतिकां कारुण्यभावान्वितां,
कल्पादौ कमलासनेन कलितां कञ्जाक्षिभिः कीर्तिताम्।
सम्पूज्याऽत्र सुधामयीं सुललितां सर्वैर्नुतां शारदां,
दिव्यां तां दिवि देवदेवविनुतां संश्रित्य मोदामहे।।

श्लों० सं० (४१)

माँ ! मोह जनितबुद्धि के कारण तथा भ्रान्ति से सम्पूर्ण जगत् स्वेतरतया भासित हो रहा है । जब तक इस स्वेतरता को अच्छी तरह नहीं समझ लेते हैं, तब तक ही इसकी स्थिरता एवं दृढता सुस्थिर रह जाती है । पूर्व जन्म में किये गये पुण्य कर्म के कारण आपके चरणों में अनन्य निष्ठा का उदय होता है और उदित निष्ठा के आधार पर आपकी आराधना करते हैं तो तज्जनित ज्ञान से अनुगत अज्ञान का नाश हो जाने से सम्पूर्ण संमोह का अपलाप हो जाता है। यह सब कुछ आपकी ही कृपा पर निर्भर है ।

श्लों० सं० (४२)

अत्यन्त सुन्दर तथा इस कलियुग में अपेक्षित अपेक्षाओं को प्रदान करने में कल्पवृक्ष के सदृश रहने वाली तथा दया प्रपूर्ण दिलवाली, सृष्टि के आरम्भ में ब्रह्मा जी के द्वारा सर्जित मनोहर नेत्र वाली देव वनिताओं से संस्तुत, अमृतोपम अनुराग से आनन्दित करने वाली, अनुपम सुन्दरता से विशिष्ट, सभी से कीर्तित, लोक में भगवान शंकर के द्वारा अभिनन्दित, माँ शारदा का आश्रय प्राप्त कर तथा उनकी आराधना करके हम आनन्दित होते हैं ।

-:४३:-

भो मातर्बहुभास्वरा बहुविधाः सन्त्यत्र भूदेवता-
स्तैः शश्वत् किमु साधनीयममितं किं वास्ति काम्यं सुखम्।
सर्वैः कामितकामना यदि तव श्रीपादपद्मेश्रिता-
स्त्यन्यैस्तै-र्भुवनाश्रितैः सुविदितैर्नाऽपेक्ष्यते तत्कृपा।।

-:४४:-

भो मातर्भुवने लसन्ति विविधा भाषाश्च भिन्नात्मिका-
स्तासां या गणनीयगौरवयुता सर्वैर्नुता भारती।
विख्याता विविधागमेषु बहुधा ब्राह्मीति भद्रात्मिका,
सा शुद्धा शुभदायिनी नियतिदा सर्वत्र विभ्राजते।।

श्लों० सं० (४३)

माँ ! इस दुनिया में अनेक रूपों, धैर्य शौर्य एवं साहसों से विशिष्ट अनेक देवता, नित्य एवं निरन्तर विराजमान हैं । इन देवताओं से अपेक्षणीय सुख या कोई भी कामना हमलोगों को इनसे नहीं है। क्योंकि सभी कामनाएँ आप के सुरम्य चरणारविन्दों में सुस्थिर हैं तो, आपके अतिरिक्त किसी भी देवता की कृपा की अपेक्षा हमलोगों को नहीं है । वे जितने भी सुप्रसिद्ध एवं इस धरातल पर विराजमान एवं पूजित क्यों न हो ।

श्लों० सं० (४४)

माँ ! इस प्रपंच में प्रचलित अनेक भाषाएँ हैं । उन भाषाओं में सभी के द्वारा उत्यन्त गौरव को प्राप्त भाषा है संस्कृत भाषा, यह लोक कल्याण कारक भाषा, ब्राह्मी के नाम से नाना प्रकार के संस्तुतियों के द्वारा नानाप्रकार के आगमों में अभिवर्णित है । वह निर्दुष्ट भाषा शुभदयुक्त भाग्यदायक भाषा के रूप में सर्वत्र विराजमान है ।

-:४५:-

यस्या आश्रयमाप्य शास्त्ररचना सर्वज्ञकल्पैः कृता,
ते वेदा भुवनाख्यभव्यसदने शिष्टैश्चिराद् रक्षिताः।
येषां दीधितिदिव्यता निखिलभूध्वान्तौघविध्वंसने,
दक्षाऽस्तीत्यनु-शास्त्ररूप-मगान्निर्वैरिभिस्तूयते।।

-:४६:-

सेव्या सा शुभदेश्वरी शुभगुणा या शारदेत्युच्यते,
नित्या सा निखिलेश्वरी निजगुणैः शस्ता प्रशस्ता पुरा।
सुव्यक्ता सुजनार्चिता समरसा सर्वत्र संशोभिनी,
भूयात् सा भुवनेश्वरी भरतभूसौभाग्यविस्तारिणी।।

श्लों० सं० (४५)

जिस भाषा का आश्रय प्राप्त कर, सर्वज्ञकल्प महर्षियों के द्वारा विभिन्न शास्त्रों की रचना की गई है । वे शास्त्र वेदों के नाम से प्रचलित है और भरतभूमि पर शास्त्र प्रेमी शिष्टों के द्वारा अनादिकाल से उन वेदों की रक्षा की जा रही है । उस वेदराशि से निर्गत होने वाली ज्ञानरूपी किरणों का प्रभाव सम्पूर्ण विश्व के प्रगाढ़ अन्धकार को नाश करने में सर्वथा सक्षम माना गया है । शास्त्रों के रूप में प्रचलित उन वेदों को सभी सहृदय मुक्तकण्ठ से गुणगान करते हैं ।

श्लों० सं० (४६)

संसेव्य गुणों से विशिष्ट, सद्गति के हेतुभूत शुभद सम्पत्ति को प्रदान करने वाली देवता, शारदा के नाम से विदित है । वह नित्य है एवं सम्पूर्ण जगत् को अपने नियन्त्रण में रखने वाली है। अपने सहज शुभगुणों के कारण सर्वत्र शंसित एवं प्रशंसित है । सुस्पष्ट अभिव्यक्ति के साथ सभी स्थानों पर समानरूप से भासित होने वाली वह माँ शारदा, भरत भूमि के सर्वाधिक वृद्धि में सहायक हों ।

-:४७:-

शिष्टैः पूजितशारदा सकलसच्छास्त्रार्थसंख्यापने,
व्यस्ता वाक्पतिसन्नुता विदितसद्विद्यार्थिसम्पोषणे।
मान्या मन्मथवैरिशंसितपदा मान्यैः सदा सेविता,
विख्याता विधिसम्भवा भवतु नो वैशिष्ट्यकीर्तिप्रदा।।

-:४८:-

भद्रा भव्यगुणा समृद्धसुजला तुङ्गान्विता तृप्तिदा,
श्रीमच्छङ्करसन्नुतातिललिता श्रृङ्गेरिपार्श्वे स्थिता,
या सा वाञ्छितदायिनी विधिनुता वैदुष्यपूर्णा नदी,
सैषा सर्वजनेप्सिता विपदि नः पायात् सदा भव्यदा।।

श्लों० सं० (४७)

सज्जनों के द्वारा पूजित माँ शारदा, समस्त उत्तमोत्तम शास्त्रों के प्रचुर प्रचार में व्यस्त है तथा सुविदित विद्याव्यसनी विद्यार्थियों के भरण पोषण के निमित्त भी व्यस्त है । वह सुप्रसिद्ध शारदा विधि के द्वारा अभिनन्दित है । कामदेव के भञ्जक भगवान शंकर के द्वारा प्रशंसित है। लोक के द्वारा स्वीकृत महानुभावों के द्वारा सेवित है । ब्रह्माजी के द्वारा सर्जित सुविदित वह माँ शारदा, हमलोगों को सर्वोत्कृष्ट कीर्ति को प्रदान करने वाली हों ।

श्लों० सं० (४८)

अनेक सुगुणों से विशिष्ट एवं हितकारक जलवाली भ्रदा नामक नदी, तुंगा नदी के साथ मिलकर तृप्ति को देनेवाली है । भगवान शंकराचार्य से अभिनन्दित होकर अत्यन्त सुन्दर नदी के रूप में श्रुंगेरी के पार्श्ववर्ती होकर प्रवाहित होती है । सम्पूर्ण कामनाओं को प्रदान करने वाली तथा ज्ञानदात्री होकर प्रवाहित होनेवाली, सभी के द्वारा अपेक्षित दिव्य नदी संकटकाल में भी हमलोगों को शुभ प्रदान करने वाली हो ।

-:४९:-

शास्त्रार्थे सकलालया प्रतिदिनं याऽऽसीत् सदा साक्षिणी,
नाम्ना चोभयभारती भुविगता भव्या शुभा भामिनी।
प्राग्वै पण्डितमण्डनेन महिता मान्या महागेहिनी,
सा नः स्यात् स्थिरवैभवा शुभकरी सर्वार्थ-सौख्यप्रदा।।

-:५०:-

हिन्दूनामकराष्ट्ररम्यरचने या सत्पथाबोधिनी,
या श्रीः सत्कुलशोभिनी सुरगुरोः सत्कीर्तिसंवर्धिनी।
यामाश्रित्य नरोत्तमा नियमतो निःश्रेयसाख्यं पदं,
काङ्क्षन्तो कमनीयदिव्यचरितां तामर्चयामो वयम्।।

श्लों० सं० (४९)

सर्वत्र समान रूप से विद्यमान रहने पर भी, भगवान शंकराचार्य एवं मण्डनमिश्र के शास्त्रार्थ में साक्षी होकर रहने वाली तथा उभय भारती के नाम से प्रसिद्ध सरस्वती इस धरातल पर अवतरित होकर, एक अलौकिक स्त्री के रूप में रहने वाली एवं मण्डन मिश्र जी, जो साक्षात-ब्रह्माजी होकर उस रूप में विराजमान थे । उनकी गृहिणी होकर तथा मण्डन के द्वारा पूजित होकर रहने वाली माँ भारती, शुभद एवं सुस्थिर सर्वार्थ संपदा प्रदान करने वाली हो ।

श्लों० सं० (५०)

हिन्दू नामक राष्ट्र की संरचना में जो मार्ग को प्रदशित करने वाली हो और अपने शील एवं सौन्दर्य से अपने वंश को सुशोभित करने वाली है । निरन्तर बृहस्पति के गौरव का विस्तार करने वाली है । जिनका आश्रय प्राप्त कर भद्र पुरूष मोक्षरूपी नित्य पद की कामना करते हैं। इस निष्कलंक दिव्य चरित्रवाली माँ शारदा की हमलोग निरन्तर आराधना करते हैं ।

-:५१:-

सत्पात्रेषु सदा शुभाशययुतेष्वार्येषु यस्याः कृपा,
स्तुत्याऽऽसीद् विबुधालिवृन्दवदने निस्स्यन्दमानेव सा।
या वै सूक्ष्मतरङ्गिणी तनुगता विश्वात्मिका वैखरी,
सा श्रीः सर्वविनोदिनी भवतु नो भाग्यास्पदं भारती।।

-:५२:-

लोके या स्तुतजाह्नवीव सुभगा सर्वैः सदाराधिता,
गैर्वाणी सुरसेविता सुमनसां गेहे च विभ्राजते।
या वै स्निग्धसरस्वती सुविदिता सर्वार्थसंसाधिका,
सौम्या सा वदनाम्बुजेऽपि विदुषां भव्या सदा भासते।।

श्लों० सं० (५१)

सुयोग्य एवं शुभदकामनाओं से विशिष्ट आर्यों के ऊपर जिनकी सहज कृपा रही थी । दिव्य देवताओं के मुखारविन्द से सहज धारापूर्वक प्रवाहित होने वाली एवं सूक्ष्म तरंगों के रूप में जिनकी वैखरीवाणी विश्वव्यापक होकर अभिव्यक्त होती है । वह देवता, शरीर को धारण कर भारती के रूप में विराजमान होकर, सबको आनन्दित करने वाली, माँ शारदा निरन्तर हमलोगों के भाग्य वर्धिका हों।

श्लों० सं० (५२)

लोक में संस्तुत गंगाजी की तरह जो सभी के द्वारा निरन्तर आराधित है । गैर्वाणी के नाम से प्रसिद्ध वह मनोहारिणी देवताओं से सेवित होकर, विद्वज्जनों के सदन में भी विराजमान रहती है । अत्यन्त कोमल स्वरूपिणी माँ सरस्वती सर्वविदित होकर सम्पूर्ण कामनाओं की संसिद्धि में तत्पर रहती है । वही माँ सरस्वती अत्यन्त विनम्र भाव से शुभ देवता के रूप में निरन्तर विद्वानों के मुखारविन्द में भी भासित होती है ।

-:५३:-

दीप्त्यालोकितभास्वराः कलितधीवैशिष्ट्यभावान्विता,
लक्ष्म्या वर्धितकान्तिपुञ्जसहिताः कल्याणमार्गे स्थिताः।
सर्वोत्कृष्टपदे समस्तविभवैर्लोकेऽपि देवेन्द्रवद्,
राजन्तो रमणीयरम्यचरितास्ते पूजका भूतले।।

-:५४:-

संश्लिष्टा सुमनोहराऽतिसुलभा सौशील्यपूर्णा परा,
निस्सीमारुणकान्तिपुञ्जलसिता कारुण्यभावान्विता।
प्रेम्णा पूर्वजसाधिता स्तुतनुता नव्या नवीनोदया,
नित्या निर्मलभावभावितगिरा साऽऽह्लादिनी स्यात् सदा।।

श्लों० सं० (५३)

माँ आपके परिपूजक, अपने ख्याति से सम्पूर्ण जगत को भासित करने वाले तथा अपने द्वारा प्राप्त किये गये बुद्धि के द्वारा विशिष्ट भाव को प्राप्त कर, माँ भगवती लक्ष्मी जी की कृपा से विवर्धित दीप्ति पुंज से देदीव्यापन होकर लोक मंगल कार्यों में व्यस्त रहते हैं । समस्त ऐश्वर्यों के साथ विख्यात निर्मल चरित्रवाले होकर, इस लोक में देवेन्द्र की तरह विराजमान हो जाते हैं।

श्लों० सं० (५४)

माँ शारदा, सभी के साथ अनुबन्धित होकर रहने वाली और सर्वाकर्षक स्वरूपवाली है। सहज निरभिमानी है । निर्दुष्ट होकर तथा श्रेष्ठ होकर रहने वाली है । सर्वव्यापक कान्तिपुञ्ज से अरुण की तरह भासित होनेवाली है और दयाद्रभाव से संवलित है । अत्यन्त निष्ठापूर्वक, आराधित पूर्वजों के द्वारा अधिगत और उन्हीं लोगों के द्वारा संस्तुत है एवं अभिनव स्वरूप से अभिव्यक्त है । नित्य एवं निर्मल भाव विशिष्ट वाणी हम सभी लोगों को आनन्दित करने वाली हों ।

-:५५:-

शिष्टे-ष्टैर्बहुधार्चिता बहुगुणा भव्या भवोत्सारिणी,
भक्तानां हितकारिणी भवति सा भक्तालिसंसेविता।
भूम्ना भूषितभव्यभावकलिता भूदेवता भारती,
सेव्या सा शुभयोगिनीपरिवृता भद्रास्पदं स्यान्मुदा।।

-:५६:-

श्वेतां श्रीप्रदपादपद्मयुगलां श्वेताब्जपीठे स्थितां
सौम्यां सन्मुनिवेष्टितामधिगतां मन्त्राक्षरैर्भाविताम्।
मुग्धां मन्त्रविशारदैर्द्विजवरैः संसेवितामर्चितां,
वन्दे सत्कुलदेवतामतिसितां मन्दस्मितां मातरम्।।

श्लों० सं० (५५)

शिष्ट पुरूषों के द्वारा अनेक प्रकार से अर्चित, अनेक सेव्य गुणों से समलङ्कृत, अलौकिक स्वरूप से विराजमान होकर अपने भक्तों के द्वारा सेवित होने पर, भक्तों के हितकारिणी होकर उन लोगों के सम्पूर्ण सांसारिक तापों को नाश कर देती है । अलौकिक आनन्द से विशिष्ट शुभद भावनाओं से दीपित होकर भूदेवता के रूप में अभिव्यक्त, माँ भारती संसेव्यगुणों से विलसित होकर तथा शुभद योगिनियों से परिष्टत होकर तथा आनन्दित होकर हम लोगों की श्रेयोदायिका हों ।

श्लों० सं० (५६)

उज्ज्वल रहने वाली, ऐश्वर्यप्रदायक चरणारविन्दों से विशिष्ट, श्वेत कमल पर विराजमान तथा अत्यन्त विनम्र रहने वाली एवं महिमामण्डित मुनियों से परिवृत और उन्ही लोगों से विज्ञात है । अत्यन्त सरल एवं मन्त्राक्षरों से भावित है । मन्त्रार्थों के मर्मज्ञ विद्वानों एवं द्विजश्रेष्ठों से सेवित एवं आराधित है । सत्कुल देवता के रूप में अभिनन्दित, नितान्त उज्ज्वल, मुदितमुखार विन्दवाली माँ शारदा को प्रणाम करता हूँ ।

-:५७:-

सर्वाकर्षकशुक्लतामधिगतां रत्नासने राजितां,
दीक्षाकार्यमहोत्सवे समधिकोत्साहेन संसेविताम्।
भद्रां भद्रजनेप्सितां सुरनुतां विश्वस्तवागीश्वरीं,
साध्यामाद्यसरस्वतीं सुललितामाराध्यदेवीं भजे।।

-:५८:-

संसेव्या सुमनोहरा सुविदिता सौवर्णभूषायुता,
या लावण्यमहोदधिर्द्विजवरैः संकीर्तिता भासते।
या सिद्धैरमरैर्महामुनिवरैः संसेविताऽऽराधिता
सा साध्वी सकलैर्नुता सकलदा पायात् सुतान् सर्वदा।।

श्लों० सं० (५७)

सर्वाकर्षक श्वेतरूप से सुशोभित एवं ज्ञात, रत्नों से समलंकृत सिंहासन पर देदीप्यमान, उपनयन आदि दीक्षाकार्यों के सन्दर्भ में अत्यन्त उत्साह के साथ सभी से संसेवित, शुभ स्वरूपिणी एवं शुभदव्यक्तियों के द्वारा अपेक्षित, देवताओं के द्वारा संस्तुत, विश्वसनीय वागीश्वरी के रूप में ग्रहण करने योग्य, अत्यन्त सुन्दर आराध्यदेवी के रूप में आद्यसरस्वती की सेवा करता हूँ ।

श्लों० सं० (५८)

संसेव्य गुणों से विलसित एवं चित्ताकर्षक स्वरूपवाली सभी के द्वारा सुविदित, सुवर्ण आभूषणों से सुशोभित है । जो सौन्दर्य के अम्बुधि होकर द्वजश्रेष्ठों के द्वारा सेवित एवं आराधित है। वह माँ सुशीला एवं सुचरिता सर्वार्थ प्रदान करने वाली है, सभी के द्वारा संस्तुत शारदा निरन्तर अपने पुत्रों की रक्षा करें ।

-:५९:-

सम्पूज्या सुमुखी सुरम्यसदना शोभावहा शारदा,
लाक्षालङ्कृतपादपद्मलसिता सातत्यदिव्यान्विता।
या वै भारतराष्ट्रसौम्यजननी या भव्यभावैर्युता,
भद्रा सा भुवनेश्वरी भवतु नो भाग्यास्पदं भारती।।

-:६०:-

निर्व्याजेन नितान्तकान्तमनिशं या मोदिनी सेवते,
संगीतेन च सर्वमान्यसुजनान् सन्तोषयन्ती सदा।
मन्त्रार्थेन हि भावितान् भवभयात् संतारणे तत्परा,
सा सेव्या सितभारती भवतु नो भव्यार्थसन्दायिनी।।

श्लों० सं० (५९)

सुलक्षणों से लक्षित माँ पूजार्हता प्राप्त प्रमुख देवता है । अत्यन्त सुप्रसन्न है । सुन्दर मुखारविन्द वाली है । सौन्दर्य सिन्धु है । मेहन्दी से समलङ्कृत पाद पद्मवाली है । शाश्वत सम्पत्प्रदायिका है । जो भारत में एक सात्विक देवता के रूप में अथवा माता के रूप में विदित है एवं परार्थ प्रधान भावनाओं से परिप्लुत है । वह भुवनेश्वरी के रूप विख्यात भद्र स्वरूपिणी माँ भारती हम लोगों के भाग्यवर्धिका हो ।

श्लों० सं० (६०)

बिना निमित्त के अपने पतिदेव को सन्तुष्ट करने वाली है तथा उनकी सेवा में तल्लीन है। निरन्तर सुप्रसिद्ध सुजनों को संगीत के द्वारा सन्तुष्ट करने में तत्पर है । मन्त्र के साथ मन्त्रार्थ को ध्यान करने वालों को इस भवभय से पार करने के निमित्त संलग्न है । सेवा करने के लिए अर्ह होकर तथा अत्यन्त उज्ज्वल होकर भासित होने वाली माँ शारदा हमलोगों को अलौकिक अर्थ के अधिगम के निमित्त प्रेरित करें ।

-:६१:-

कान्तारेषु सुरम्यकान्तिकलितेष्वाह्लादकूलेषु वा,
या हेमाद्रितलेषु शीतसदनेष्वाकाशवीथीषु वा।
कौटीरेषु सुधीन्द्रसौम्यसदनेष्वास्निग्धतल्पेषु वा,
सा सर्वत्र विहारिणी भवतु नो भूतिप्रदा भारती।।

-:६२:-

दृष्ट्वा कश्चन भारतेऽत्र लसितं विद्याधिपैरादृतं,
वैदुष्यं गणनीयगौरवयुतं गीर्वाणविद्यान्वितम्।
श्रुत्वा विश्वगुरोः प्रदीप्तयशसां त्यक्त्वा स्वकीयं गृहम्,
भक्त्यागत्य विधानतः सविनयं त्वामेव संसेवते।।

श्लो० सं० (६१)

चान्दिनी के कान्ति से सुशोभित उपवनों में, मनोहर नदियों के तीर में, हिमाचल के उपत्यकाओं में, शीतल सदनों में, आकाश के मार्गों में, पर्णकुटीरों में, श्रेष्ठ विद्वज्जनों के निवास स्थानों में, मृदुमय तल्पों पर शयन करने वाली तथा सर्वत्र विराजमान माँ भारती हमलोगों को ऐश्वर्य प्रदान करने वाली हों ।

श्लो० सं० (६२)

वैदेशिक, भारत में विराजमान एवं विद्वज्जनों के द्वारा सम्मानित विश्वगुरुओं के विद्क्ता को देखकर और उनके गणनीय गौरव जो उनकी संस्कृत विद्या से सम्बन्धित है । ऐसे गुरुजनों के यश को सुनकर साक्षात् प्रत्यक्षदर्शी के रूप में देखकर अपने घर को छोड़कर, शास्त्रीय मर्यादा के अनुसार भारत में आकर भक्ति भाव से उन्हीं की सेवा करने लगते है ।

-:६३:-

सर्वैः काङ्क्षितभारते सुविदितं विज्ञैः प्रसिद्धैर्नुतं,
सर्वाकर्षकमद्भुतं समुदितं तेजोऽस्ति सम्मोहकम्।
मातस्त्वत् पदपद्मयुक्तरजसा स्रष्ट्रा पवित्रीकृतान्,
मन्ये भारतगौरवं प्रतिदिनं सर्वत्र संश्रूयते।।

-:६४:-

कल्पान्ते विधितो विविक्तसदना चिन्मात्रया संस्थिता,
सृष्ट्यादौ सरसातिरम्यहृदया सा सर्जयन्ती शिशून्।
आस्ते या किल शास्त्रसम्मतदिशा सर्वांश्च संवर्धने,
संसक्ता स्थिरभारती भवतु नः भूमाख्यविद्याप्रदा।।

श्लो० सं० (६३)

सभी के द्वारा अपेक्षित अपने भारत में, सभी के द्वारा ज्ञात एवं प्रसिद्ध विद्वानों के द्वारा संस्तुत, सभी को आकर्षित करने वाला अद्भुत एवं समुद्भूत, सम्मोहक एवं विलक्षण तेज है। इस विलक्षण तेज से युक्त होने के कारण और माँ भारती के चरणारविन्दों में अंकित पादधूलि से ब्रह्मा जी द्वारा इस भारत को पवित्र करने के कारण से ही, भारत का यह गौरव प्रतिदिन सभी देशों में सुना जाता है । इस विलक्षणता के हेतु को मैं भी स्वीकार करता हूँ ।

श्लो० सं० (६४)

कल्प के समाप्ति के उपरान्त ब्रह्माजी से अलग होकर अपने सहज चिन्मात्रा से विद्यमान रहने वाली माँ भारती, पुनः सृष्टि के आरम्भ में अत्यन्त सरस हृदया होकर, सृष्टि की सर्जना कर देती है और शास्त्रीय मर्यादाओं के अन्तर्गत रहकर उस सृष्टि के संवर्धन में तल्लीन हो जाती है । इस प्रकार अपने कार्य में तत्पर रहने वाली माँ भारती हमलोगों को भूमा नाम से कही जानेवाली विद्या प्रदान करने की कृपा करें ।

-:६५:-

कल्पादौ कमनीयभावसहिता कारुण्यपूर्णानिशं,
नेयान् व्याकृतसर्वजीवनिचयान् स्नेहेन वा सादरम्।
सृष्ट्वा लौकिकलोकपालकगणान् धीराँस्तथा धीप्रदान्,
सन्तुष्टा किल भारती भवतु नः सर्वत्र शान्तिप्रदा।।

-:६६:-

यस्याः संभ्रमलीलया भरतभूर्गण्या सदा सत्कृता,
विश्वस्मिन् सकलैः सदार्चितपदा वैविध्यधीशोभिता।
पुत्रैः प्राकृतवाददोषरहितैः पाण्डित्यपूर्णान्वितै-
र्विख्याता विधिनोदिता भवतु नो भव्या सदा भारती।।

श्लो० सं० (६५)

कल्प के आदि में मनोहर भावों से युक्त होकर, दयार्द्र हृदया होकर, जिन जीवों की सृष्टि करनी है उन जीव समूहों को, अत्यन्त स्नेह एवं आदर के साथ व्यावहारिक क्षेत्र में अपेक्षित लोकपालक गणों को, धीरों को, सृष्टि करके, बुद्धिजीवियों एवं शिक्षकों को अभिव्यक्त करके सन्तुष्ट रहनेवाली माँ भारती हमलोगों को सर्वदा सर्वत्र शान्ति प्रदायिका हों ।

श्लो० सं० (६६)

जिनकी आश्चर्यजनक लीलाओं से भरत भूमि निरन्तर गणनीय एवं गौरवान्वित है । सम्पूर्ण विश्व में सदा आराधित होकर नानाप्रकार के ज्ञान से सुशोभित है । अपने प्राकृतवाद जनित दोषों से रहित एवं वैदुष्य प्रपूर्ण पुत्रों से विख्यात है एवं विधि के द्वारा आविष्कृत माँ भगवती भारती हमलोगों को शुभदायिका हो ।

-:६७:-

यस्या वैदिकवाङ्मयं निखिलभूविज्ञानविस्तारकं,
यत्राध्यात्मिकसम्प्रदायकलितं ज्ञानं गम्भीरं स्थिरम्।
विज्ञैः स्वीकृतपारमार्थिकगतिं गम्यञ्च या ज्ञापिका,
तस्याः पूरितचित्प्रभा भवतु नश्चिमात्रसंस्मारिका।।

-:६८:-

आदौ याऽत्र सरस्वतीति बहुधा विद्वद्भिरासेविता,
पूज्या जीवनदीमहामुनिवरैः सम्पूजिता कीर्तिता।
धन्या सा मुनिबादरायणनुता भागीरथी प्राग्भवा,
सा नः स्यान्मृदुभाषिणी मधुमती मुग्धा मनोह्लादिनी।।

श्लो० सं० (६७)

जिसके वैदिक वाङ्मय सम्पूर्ण जगत से अपेक्षित विज्ञान के विस्तारक है । आध्यात्मिक सम्प्रदाय के द्वारा अर्जित ज्ञान अत्यन्त गम्भीर एवं सुस्थिर है । सुप्रसिद्ध मनीषियों द्वारा स्वीकृत पारमार्थिक ज्ञान एवं गम्य के ज्ञापक है । उन्हीं के द्वारा पूरित यह ज्ञान की ज्योति हमलोगों के अपनी चित्स्वरूप को स्मरण दिलाने वाली हो ।

श्लो० सं० (६८)

अपने इस भरत खण्ड में सर्वप्रथम सरस्वती नामक पूज्य जीवनदी विद्वज्जनों के द्वारा सेवित एवं मनीषी महर्षियों के द्वारा पूजित एवं संकीर्तित थी । जो भगवान् वेदव्यास जी द्वारा सन्नुत गंगा जी के पूर्ववर्ती थी । वह जीवनदी के रूप में विराजमान कोमलवाणी से युक्त तथा मनोहर भावों से विशिष्ट एवं निरभिमानी सरस्वती हमलोगों के मन को आनन्दित करने वाली हों ।

-:६९:-

कञ्जाक्षी कमलालयदिसहिता कल्याणभावैर्युता,
प्राग्वन्द्या परमा परार्थनिरता प्रत्यक्षगम्या सताम्।
नित्याख्या निखिलेश्वरी निखिलदा नित्यार्चिता निर्मदा,
सा वाणी शरणागतानवतु नो विद्याप्रदा वाक्प्रिया।।

-:७०:-

अल्पज्ञैरपि सेवकैः प्रतिदिनं सम्पूजिता सेविता,
स्याद् तत्कृतसेवया प्रमुदिता वात्सल्यभावान्विता।
विप्रैः सस्वरमन्त्रगीतिसहितात्कृत्याद् यथा तत्फलम्
तेभ्यः सा परिपूर्णसौख्यमतुलं दत्वा च सम्मोदते।।

श्लो० सं० (६९)

कमल के सदृश नेत्रों से सुन्दर दीखने वाली, लक्ष्मी आदि के साथ विचरण करने वाली, लोक कल्याण कारक भावों से युक्त होकर रहने वाली, सर्वप्रथम प्रणाम के अर्ह तथा सर्वोत्कृष्ट परार्थ कार्यों में निरन्तर रहने वाली है और सज्जनों के द्वारा दृष्ट है । नित्य कहे जाने वाली, सम्पूर्ण जगत के नियन्त्रिका एवं सम्पूर्ण कामनाओं के प्रदायिका निरन्तर पूजित एव निरभिमानी, मधुरवाणी से सभी को प्रभावित करने वाली तथा विद्या प्रदान करने वाली वह वाणी अपने शरण में आये हुए सभी की रक्षा करें ।

श्लो० सं० (७०)

अनपढ़ या पामर व्यक्तियों से अथवा सेवकों से पूजित या सेवित होने पर, उनलोगों द्वारा की गई पूजा या सेवा से सन्तुष्ट हो जाने पर, वह माँ भारती वैदिकों द्वारा सम्पादित सस्वर मन्त्र एवं गीत आदि से विशिष्ट सत्कर्म का जो फल देना है उतना ही फल, वात्सल्यभावान्वित होकर उन सामान्य व्यक्तियों को भी असदृश एवं सम्पूर्ण सौरव्य रूपी फल देकर सन्तुष्ट हो जाती है।

-:७१:-

ऐंकाराक्षरबीजमन्त्रसहितां सार्वत्रिकीं शाश्वतीं,
दीप्तां दीधितिदिव्यतेजलसितां शुद्धां सुधीन्द्रैर्नुताम्।
सुव्यक्तां शुभदां सुरम्यचरितां सामान्तगैः सत्कृतां,
वन्दे वाक्पतिकामितां कुलवधूं स्मेराननां शारदाम्।।

-:७२:-

ब्रह्मेन्द्रादिभिरर्चितां पुरभिदा पूज्येति संकीर्तितां,
शस्तां शास्त्रनिषेवणेऽत्र निरतैर्नित्येति नित्येप्सिताम्।
नित्याप्तां निगमादिशास्त्रनिचये निर्दुष्टपद्यैर्नुतां,
नौमि त्वां नवनीततुल्यहृदयां निर्वाणदात्रीं नवाम्।।

श्लो० सं० (७१)

वाग्बीज कहे जाने वाले ऐंकार एवं तत्सम्बन्धी मन्त्र के ज्ञात्री होकर रहने वाली, वाणी के रूप में सर्वव्यापिका होकर तथा शाश्वत होकर रहनेवाली, देदीप्यमान अपने मुखारविन्द से निर्गत होनेवाली किरणों के दिव्य तेज से आभामय होकर भासित होनेवाली, अत्यन्त निर्मल एवं सुप्रसिद्ध विद्वानों द्वारा अभिनन्दित तथा सुस्पष्ट दीखने वाली, शुभदायक फल देनेवाली, अनुकरणीय आदर्शचरित्रवाली, सामवेद के आशय से अवगत विद्वानों द्वारा सम्मानित, ब्रह्मा जी के द्वारा अपेक्षित, प्रशस्त कुलवधू के रूप में ख्याति प्राप्त, आकर्षक मुखारविन्दवाली शारदा को प्रणाम है ।

श्लो० सं० (७२)

ब्रह्मा-इन्द्र आदियों के द्वारा अर्चित, भगवान शंकर द्वारा पूज्या मानकर अभिनन्दित, प्रशस्त एवं शास्त्रीय परिचर्चा में निरत विद्वानों के द्वारा नित्या मानकर निरन्तर अपेक्षित, स्वार्थरहित एवं निमगमादि शास्त्रों में सम्मानजनक श्लोकों द्वारा अभिनन्दित नवीन एवं नवनीत सदृश कोमल हृदयवाली तथा कैवल्यप्रदात्री मानकर आपको प्रणाम करता हूँ ।

-:७३:-

शुभ्रां श्रीपतिपूज्यदिव्यचरणां शुभ्राम्बरालङ्कृतां,
तन्त्रीवादनतत्परामभिनवामानन्दकन्दात्मिकाम्।
कम्रां कामितकल्पवृक्षसदृशीं कर्पूर-गौरोज्ज्वला-
माद्यामाश्रितपण्डितैरभिनुतां त्वामर्चयामो वयम्।।

-:७४:-

हृद्यां हृल्लसितां सितां हृदिगतां हृत्तापशेषापहाम्,
सर्वज्ञां सुरवृन्दवन्दितपदां स्तुत्यां शुभाकाङ्क्षिणीम्।
सारासारनिरूपणेऽतिचतुरां सर्वज्ञमूर्त्या नुतां,
वन्दे तामतिसुन्दरीमजसखीमाह्लादयुक्ताननाम्।।

श्लो० सं० (७३)

अत्यन्त निर्मल, श्रीपति द्वारा पूजित, दिव्य चरणवाली एवं विशुद्ध श्वेत वस्त्रों से समलंकृत, वीणा के वादन में तत्परा होकर रहनेवाली तथा अभिनव स्वरूपवाली और घनीभूत आनन्द के रूप में भासित, अत्यन्त मनोहर, अपेक्षाओं को पूर्ण करने में कल्पवृक्ष के संदृश, कपूर जैसे गौरांग से उज्जवल आदिदेवी के रूप में स्वीकृत, आश्रित पण्डितों के द्वारा संस्तुत आपको हमलोग अर्चना करते हैं ।

श्लो० सं० (७४)

अत्यन्त मनोहर, सुकुमार हृदया होकर भासित होनेवाली, उज्ज्वल तथा अन्तःकरण में प्रविष्ट, हृदय के अवशिष्ट ताप को मिटाने वाली, सर्वज्ञात्री, देववृन्दों से नमस्कृत चरणाविन्दवाली, स्तवनीय गुणवाली एवं सबको कल्याण चाहने वाली तथा सार्थक तथा निरर्थक के निर्णय में अतिकुशल, भगवान् शंकराचार्य द्वारा अभिनन्दित, अत्यन्त मनोज्ञ एवं ब्रह्माजी की सहचरी होकर रहने वाली, सर्वाकर्षक मुखारविन्दवाली आपको प्रणाम है ।

-:७५:-

संक्षिप्तैरभियाजनैः श्रुतिगतैस्त्वामर्चयन्तो वयं,
सुश्रीं सूरिजनार्चितां शुभयुतां सौन्दर्यसारान्विताम्।
आसाद्यखिलसार्वभौमपदवीं सर्वैः सदा संस्तुतां,
भुक्त्वाभौतिकसार्वदेशिकसुखं त्वामेव सेवामहे ।।

-:७६:-

ये जन्मार्जितपुण्यपुञ्जवशतः सर्वत्र संशोभितां,
पूज्यां त्वां निजलीलयाऽत्रवितत‌ां संवीक्ष्यसौख्यास्पदम्।
तुष्टास्ते चिरमीक्षितां सुरनुतां सौम्यां प्रसन्नाननां,
राजन्ते भुवि भक्तिभावसहिता नित्यं स्तुवन्तो मुदा।।

श्लो० सं० (७५)

शास्त्र सम्मत अत्यन्त संक्षिप्त यज्ञों के द्वारा आपकी पूजा करते हुए हमलोग शुभलक्षणों से संवलित, विद्वज्जनों के द्वारा आराधित, शुभद सामग्री से विशिष्ट, एकत्रित सौन्दर्य सार से अभिरञ्जित, सभी के द्वारा निरन्तर संस्तुत, आपके माध्यम से, सम्पूर्ण जगत के द्वारा अभिनन्दित सर्वोत्कृष्ट पद को प्राप्त करके, उस पद के द्वारा प्राप्त होनेवाले समस्त स्थानों से उपलब्ध सुखों के उपभोग के उपरान्त भी आपकी ही सेवा करते हैं अर्थात् आप ही को सर्वस्व मानकर सेवा करते हैं ।

श्लो० सं० (७६)

जो अपने जन्म-जन्मों से समुपार्जित पुण्य पुञ्ज के वशवर्ती होकर, सर्वत्र देदीप्यमान होकर अपनी शोभा बढ़ानेवाली, पूज्य एवं अपनी लीलाओं के निमित्त सर्वव्यापक होकर रहनेवाली तथा सम्पूर्ण सुखों के आगार होकर भासित होनेवाली आपको देखकर, देवताओं द्वारा संस्तुत, सत्त्विक स्वभाववाली, सुप्रसन्न मुखारविन्दवाली, चिरकाल से इस धरातल पर अपेक्षित आप ही को अत्यन्त आनन्द के साथ स्तुति करते हुए सुशोभित होते हैं ।

-:७७:-

ह्रींकारान्वितसम्पदं स्मितमुखीं स्वर्लोकदेवेप्सितां,
भक्त्या ते हि कृपाकटाक्षवशतो लब्ध्वा श्रियं भूतले।
भूयस्ते भवदीयलोकसुलभं भव्यं भवद्दर्शनं,
प्राप्स्यन्ते चिरकाङ्क्षितं सुललितं सर्वेप्सितं श्रीकरम्।।

-:७८:-

या श्लाघ्याऽत्र सरस्वती शुभतमा सिद्धान्तविद्याप्रदा,
या सत्त्वदिगुणान्विताऽतिविशदा या स्नेहपूर्णारुणा।
या ब्रह्मेशकुलोद्भवा कुलसती या कल्पवल्ली सतां,
सा ब्राह्मी भवतापहा भवतु नो भक्तप्रिया भारती।।

श्लो० सं० (७७)

काम बीज के रूप में स्वीकृत ह्रींकार युक्त सम्पदा से विशिष्ट, प्रसन्न आननवाली, स्वर्ग के देवताओं द्वारा अपेक्षित तथा आपकी ही कृपा कटाक्ष से प्राप्त होनेवाले ऐश्वर्य को इस धरातल पर भक्ति के माध्यम से प्राप्त करके, पुनः आपके लोक में उपलब्ध होनेवाले आप ही का अलौकिक दर्शन, जो चिरकाल से आकांक्षित अत्यन्त मनोहर एवं सभी के द्वारा अपेक्षित, कल्याण कारक पद को प्राप्त कर लेते हैं ।

श्लो० सं० (७८)

इस धराधाम पर स्तवनीय गुणों से विशिष्ट जो माँ सरस्वती है । वे अत्यन्त शुभप्रदायिका है। निर्दुष्ट विद्या को प्रदान करने वाली है। सात्विक गुणों से परिपूर्ण होने से अत्यन्त शोभान्वित है और अनुराग प्रपूर्ण ह्रदय वाली है। जो ब्राह्मणकुल में अवतरित है। आदर्श कुलांगना है। सज्जनों के सम्पूर्ण कामनाओं को प्रदान करनेवाली, कल्पवृक्ष के सदृश है और ब्राह्मी के रूप में विख्यात, भारती के नाम से ज्ञात, भक्तों के अत्यन्त प्रिय लगनेवाली माँ शारदा हमलोगों के भवताप को हरण करने वाली हों।

-:७९:-

क्लींकारी प्रियपार्वतीसहचरी श्रृंङ्गारलीलाऽऽश्रया,
सौवर्णारुणकान्तिदा कमलभूसंक्रान्तिशोभावहा।
निस्सीमा निखिलालया निरुपमा नित्यार्चिता निर्मला,
नव्या नादकलान्विता नयतु नो नित्याय नित्येश्वरी।।

-:८०:-

शास्त्रीयेषु सदा सभाख्यसदनेष्वासेव्यगोष्ठीषु वा,
संगीतान्वितशास्त्रवाद्यसहितेष्वानृत्यशालासु वा।
या तीर्थीकृतपुण्यपुञ्जसलिलेष्वापुष्पकुञ्जेषु वा,
विख्याता विधिनेरिता भवतु नो विद्याप्रदा भारती।।

श्लो० सं० (७९)

माया बीज के रूप में स्वीकृत परम प्रेमास्पद पार्वती के सखी के रूप में, उनके साथ-साथ अनेक श्रृंगार लीलाओं का अवसर प्रदान करने वाली है और सुवर्ण एवं अरूण मिश्रत कान्ति को प्रदान करने वाली है। ब्रह्मा जी के द्वारा परिवर्तित अभिनव सृष्टि की शोभा बढ़ाने वाली है। सर्वव्यापिका है। सर्वत्र विद्यमान रहनेवाली है । असदृश है । निरन्तर पूजित एवं निर्दुष्ट है। नित्य नूतन एवं नाद बिन्दु कलाओं से विशिष्ट माँ भगवती भारती नित्येश्वरी होकर हमलोगों को नित्य सुख के निमित्त प्रेरित करें ।

श्लो० सं० (८०)

शास्त्रीय शुभद कार्यों में, सभागारों में, विद्वद्गोष्ठियों में, संगीत के साथ-साथ शास्त्रीवाद्यों सहित सम्पन्न होनेवाले नृत्यशालाओं में, विशिष्ट महात्माओं द्वारा तीर्थ के रूप में परिवर्तित पुण्य पुंज के आश्रय स्वरूप जलाशयों में, पुष्पों की लताओं से निर्मित झाड़ियों में, विधि के द्वारा अवगत एवं ख्याति प्राप्त माँ भारती हमलोगों की ज्ञान प्रदायिका हों ।

-:८१:-

शिष्टेष्टा सकलार्चिता सकलसद्धीवर्धने तत्परा,
सौम्या सुस्थिरवेदशास्त्ररचने या प्रेरिकेत्युच्यते।
नित्या निर्मलगीतिशास्त्रगमिता गीर्वाणवृन्देप्सिता,
सा साध्वी सकलाश्रिता भवतु नो भूतार्थविज्ञापिका।।

-:८२:-

आदौ या विधिना प्रसिद्धधिषणा संसर्जिता शारदा,
भव्या सा भुवनेश्वरी क्षितितले रत्नोज्ज्वला भारती।
नव्या नव्यकलान्विता निखिलभूदेवाश्रिताभ्यर्चिता,
नित्या सा भवजाड्यपुञ्जदलने व्यस्ताऽत्र संभासते।।

श्लो0 सं0 (८१)

सज्जनों के अत्यन्त प्रियतम, सभी से आराधित, सभी को सद्बुद्धि प्रदान करने में निरत, सात्विक स्वभाववाली, शाश्वतवेद शास्त्रों की संरचना में प्रेरिका के रूप में वर्णित, नित्य एवं निर्दुष्ट नीतिशास्त्रों द्वारा अवगत, देवताओं द्वारा कामित, सबके आश्रय के रूप में स्वीकृत, सुशील गुणसंयुक्त माँ भारती हमलोगों को शाश्वत अर्थ स्वरूप आत्मा को स्मरण दिलाने वाली हों ।

श्लो0 सं0 (८२)

सर्वप्रथम सुविख्यात बुद्धिमान के रूप में स्वीकृत ब्रह्मा जी के द्वारा अभिव्यञ्जित माँ शारदा, अलौकिक होकर तथा भुवनेश्वरी होकर इस धरातल पर रत्नों के सदृश अज्जवल होकर भासित हो रही है । नित्य नूतन होकर, नवीन कलाओं से विशिष्ट होकर, सम्पूर्ण देवताओं का आश्रय होकर, उनलोगों द्वारा पूजित होकर, सनातनी होकर, लोक में परिव्याप्त आलस्यरूप अज्ञान के समुदाय को नाश करने में व्यस्त होकर, माँ भारती भासित हो रही है ।

-:८३:-

भक्तानां हितकारिणी भवति सा सौभाग्यसंवर्धिनी,
विख्याता विमला विशालहृदया लालित्यलीलाश्रया।
या सेव्या विनयान्विता विमलसत्तीर्थेषु संचारिणी,
सा माता श्रुतिसारदा भवतु नो भूतार्थसंबोधिनी।।

-:८४:-

सृष्ट्यादौ विधिनार्थिता च महिता मातृत्वसंधारिणी,
सौख्यानां वरदायिनी प्रथितषट् शास्त्रेषु या काशिनी।
विघ्नानामपनोदिनी शुभकरी सौविध्यविस्तारिणी,
सा शुद्धा स्थिरभारती भवतु नो हृद्ध्वान्तविध्वंसिनी।।

श्लो० सं० (८३)

भक्तों को हित करने वाली और उनलोगों के सौभाग्य का विस्तार करनेवाली माँ शारदा, विशुद्ध एवं विशालहृदया होकर, मनोहर लीलाओं का आश्रय देनेवाली है । जो सेवा करने योग्य है और अत्यन्त विनम्रा है तथा पवित्र तीर्थस्थानों में विहार करनेवाली है । माँ शारदा श्रुति के द्वारा निर्दिष्ट सारतत्त्व के ज्ञापिका है वही सुप्रसिद्ध माता हम लोगों को यथार्थ अर्थ को बोधन करने वाली हों ।

श्लो० सं० (८४)

सृष्टि के आरम्भ में ब्रह्मा जी द्वारा पूजित होकर एवं उनकी प्रार्थना को सुनकर माता बनने की अपनी स्वीकृति प्रदान करने वाली है । सम्पूर्ण सुविधाओं को प्रदान करने वाली है और सुप्रसिद्ध षट्शास्त्रों में प्रकाशित होने वाली है । कार्य के सम्पादन में सम्भावित विघ्न बाधाओं को दूर करने वाली है । सबके हितकारक कार्य करनेवाली है तथा सुविधाओं का विस्तार करनेवाली है । वह निर्मल एवं नित्यस्वरूपिणी माँ भारती हमलोगों के अन्तःस्थली में अवस्थित अज्ञानरूपी अन्धकार को विध्वंस करने वाली हों ।

-:८५:-

सत्काव्ये पदवाक्यसूत्रनिचये प्रामाणिके लक्षणे,
शिक्षायां स्मृतिनामके सुविदिते वैज्ञानिके ज्यौतिषे।
नित्याख्ये तु निरुक्तनीतिविषये पौराणिके वा सदा,
या सर्वत्र सुशोभिनी भवतु सा वेदार्थविद्योतिनी।।

-:८६:-

सौम्या या सुकुमारकाव्यकलिता कञ्जाक्षिभिःकीर्तिता,
सस्नेहास्पदशारदा श्रुतिनुता यज्ञादिभिस्सेविता।
स्तुत्या सत्कुलवासिनी सकलसद्विप्रेप्सिता पूजिता,
सा नः स्याद् हृदयेश्वरी हृदिगता संवित्प्रभा भारती।।

श्लो० सं० (८५)

सुप्रसिद्ध एवं शास्त्र सम्मत सत्काव्यों में, व्याकरण एवं न्याय से सम्बन्धित सूत्र समुदायों में, मीमांसा एवं साहित्यक ग्रन्थों में, शिक्षा नामक वेदांग रूप शास्त्र में, मनु आदि स्मृतियों में, वैज्ञानिक ग्रन्थों में, ज्योतिष शास्त्र में, नित्य कहे जाने वाले वेदों में, निरुक्त एवं नीतिविषयों में, वायु आदि पौराणिक ग्रन्थों में, निरन्तर एवं सभी निर्दिष्ट स्थानों पर सुशोभित होनेवाली माँ शारदा, वेदार्थ को विशेष रूप से प्रकाशित करनेवाली हों ।

श्लो० सं० (८६)

सात्विक प्रकृतिवाली तथा अत्यन्त मनोहर काव्यों में चर्चित होनेवाली है । कमल सदृश सुन्दरनेत्रों वाली सुरललनाओं से कीर्तित एवं स्नेहयुक्त माँ शारदा, श्रुति के द्वारा सन्नुत तथा यज्ञादियों द्वारा सेवित है । स्तवनीय गुणों से विशिष्ट, प्रशंसनीय परिवारों में निवास करनेवाली, सदाचार सम्पन्न सभी ब्राह्मणों द्वारा अपेक्षित एवं पूजित है । अन्तःकरण में प्रविष्ट, ज्ञानरूपी आलोक से सुशोभित होनेवाली माँ भारती हमारे चित्तवृत्तियों के नियन्त्रिका हों ।

-:८७:-

सिद्धैः प्राक्तनकिन्नरैः प्रथितसद्गन्धर्वयक्षादिभिः,
प्रौढैः संस्तुतसर्वमान्यसुजनैः संगीतशास्त्रे रतैः।
सुभ्रूभिः सुजनालिसेव्ययतिभिः सम्प्रार्थिता शारदा,
पायान्नः परमेश्वरी प्रियकरी प्रख्यातवागीश्वरी।।

-:८८:-

विश्वस्तैर्विबुधैर्विशुद्धचरितैर्विद्योत्तमैः सेविता,
या वाणी विदिता सिता तनुगता तन्त्रागमे स्तूयते।
यस्या आश्रयमाश्रिता मुनिजनाः श्लोकैश्च लोकोत्तरै-
स्तां सेव्यां समुपास्य नित्यविधितो विख्यातिमातन्वते।।

श्लो० सं० (८७)

अनादिकालीन सिद्धपुरुषों से, किन्नरों से, सुप्रसिद्ध गन्धर्व एवं यज्ञआदियों से, अभिनन्दित एवं सभी के द्वारा स्वीकृत परिपक्वमतियों से तथा सज्जनों से, संगीत शास्त्र में निमग्नव्यक्तियों से, सुन्दर भौंहेवाली रमणियों से, सज्जनों के द्वारा सेवित यतियों से, विनम्रता पूर्वक प्रार्थित माँ शारदा, परमेश्वरी के रूप में, हमलोगों के निमित्त अत्यन्त प्रियकार्य करनेवाली, प्रख्यात वाक् की देवता निरन्तर हमारी रक्षा करें ।

श्लो० सं० (८८)

विश्वसनीय देवताओं के द्वारा, निष्कलङ्क चरित्रवालों से, उन्नत विद्या को प्राप्त कर चुके विद्वानों के द्वारा, सेवित माँ वाणी विदित होकर, उज्ज्वल होकर, शरीरधारण कर भासित होनेवाली है । तन्त्र एवं आगमशास्त्रों में वर्णित है । जिनके आश्रय को प्राप्तकर महामनीषी महर्षियों ने दिव्यश्लोकों के द्वारा वन्दना करते हुए तथा सेवनीय माता की नित्यविधिपूर्वक उपासना करते हुए अपने गौरव का विस्तार कर लेते हैं।

-:८९:-

या ब्राह्मी विनुता श्रितैः परिजनै रम्यारविन्देक्षणा,
यस्याः सौम्यकला सदात्र सुजनैः सर्वात्मना संस्तुता।
यामाश्रित्य तपोधनाः प्रतिदिनं विज्ञानसंवर्धने,
व्यस्ताः सन्त्यनुसेव्य-दिव्यचरणां संश्रित्य मोदामहे।।

-:९०:-

शिष्टैः संस्तुतसार्वदेशिककृपा सर्वत्र विभ्राजते,
यां पूज्यामनुपूज्य भक्तजनता निर्मत्सरा जायते।
यद्गात्रं विबुधालिसेव्यसुलभं लोकोत्तरं वर्तते,
तद्रूपं हृदयारविन्दसदने ध्यायामहे सन्ततम्।।

श्लो० सं० (८९)

माँ शारदा ब्राह्मी के रूप में संस्तुत है तथा अपने आश्रय में रहने वाले परिजनों से सत्कृत है । सुन्दर एवं सौम्य तथा निर्मल कृपा कटाक्षवाली है । जिनकी अत्यन्त कोमल कलाएँ सज्जनों द्वारा निरन्तर यहाँ पर पूर्णतया वर्णित है । जिनका आश्रय प्राप्त करके तपोधन महात्मा, विज्ञान के विकास में व्यस्त हैं । उस निरन्तर संसेव्य माँ भारती के दिव्यचरणों का आश्रय प्राप्तकर हमलोग सन्तुष्टि का अनुभव कर रहे हैं ।

श्लो० सं० (९०)

शिष्टों के द्वारा संस्तुत जिनकी कृपा सर्वत्र देदीप्यमान है । जिस पूज्य देवता की पूजा करके सर्वसाधारण जनता मात्सर्य रहित हो जाती हैं जिनका शरीर देवताओं द्वारा ध्येय योग्य होकर अलौकिक प्रतीत हो रहा है । उसी माँ के चिन्मय स्वरूप को अपने हृदयरूपी अरविन्द सदन में निरन्तर ध्यान करते रहते हैं ।

-:९१:-

भो मातर्भरताख्यभूविलसतां धीवर्धने धीमतां,
हेतुस्तत्र तपोधनैरधिगता निर्हेतुकी त्वत्कृपा।
आसीत्साऽस्ति सुधामयी सदमला सर्वैः सदाराधिता,
तस्मात्तां सुजनेरितां तव कृपां काङ्क्षामहे शश्वतीम्।।

-:९२:-

दिव्यां देवमनुष्यपूजितपदां देदीप्यमानाननां,
रम्यां राजसरागदोषरहितां रत्नोज्ज्वलैर्भूषिताम्।
शिष्टैः सत्कृतशारदां शरदि सत्सौदामिनीसन्निभां,
वन्दे वाक्पतिपूजितामभिनवामाचार्यवृन्दैर्नुताम्।।

श्लो० सं० (९१)

माँ शारदा ! भरतभूमि में जन्म लेकर विराजमान बुद्धिमानों के बुद्धि को विलक्षण बनाने के निमित्त अपेक्षित कारण, तपोधनों के द्वारा अधिगत आपकी निस्वार्थ अनुपम कृपा है । आपकी वह कृपा अनादिकाल से थी और आज भी है । आनन्द स्वरूपिणी होकर, विशुद्ध होकर, सभी के द्वारा आराधित होकर, रहनेवाली माँ, सज्जनों के द्वारा सुविदित एवं शाश्वत होकर रहनेवाली, आपकी कृपा की अपेक्षा करते हैं ।

श्लो० सं० (९२)

अलौकिक एवं देवता तथा मनुष्यों के द्वारा पूजित चरणारविन्द से विशिष्ट, आभामय मुखारविन्द वाली मनोहर एवं रजोगुण से उत्पन्न दोषों से रहित, उज्ज्वल रत्नों से आरचित आभूषणों से अलङ्कृत, सज्जनों द्वारा अभिनन्दित, शरत्कालीन चान्दनी के सदृश भासित होनवाली, ब्रह्माजी के द्वारा उपासित, अत्यन्त नवीन, आचार्य मण्डली द्वारा संस्तुत माँ शारदा को प्रणाम है ।

-:९३:-

जन्तोर्जन्मविदारिणीं बुधजनैर्जन्मान्तरेणेप्सितां,
भद्रां भूगतदेववन्दितपदां भक्तालिभिर्भाविताम्।
सर्वां सर्वजनेप्सितां सकलसच्छास्त्रेषु सन्दीपितां,
वन्दे विश्वजनाश्रितां विधिनुतां विश्वाधिपैर्वीक्षिताम्।।

-:९४:-

नित्यां निर्मलवेदवादसहितां निर्लोभरागान्वितां,
स्तुत्यां शङ्करसन्नुतां सुनयनां सौवर्णवीणान्विताम्।
तृप्तां तात्त्विकतन्त्रमन्त्रवचनैस्तापत्रयोत्सादिकां,
वन्दे सन्मुनिवन्दितां सुविदितां श्रीशारदां मातरम्।।

श्लो० सं० (९३)

आश्रित जीवों के जनन मरण आदि दुःखों को दूर करने वाली, विद्वज्जनों द्वारा जन्म-जन्मान्तरों से अपेक्षित, शुभ लक्षणों से समन्वित, धराधाम पर विराजमान देवताओं द्वारा नमस्कृत चरणारविन्दवाली, भक्त मण्डलियों से स्वीकृत, सम्पूर्ण रूपों में प्रतिभासमान, सर्वसाधारण से अभीप्सित, समस्त शुभद शास्त्रों में चर्चित, सम्पूर्ण जनता के द्वारा आश्रित, विधि सन्नुत, चक्रवर्ती-सम्राटों द्वारा दर्शित, माँ भगवती भारती को प्रणाम है ।

श्लो० सं० (९४)

चिरन्तन एवं निर्दुष्ट वेद की चर्चा में निरत, बिना लोभ के समुद्भूत अनुराग से विशिष्ट, स्तवनीय एवं आचार्य शंकर के द्वारा अभिनुत, सर्वाकर्षक नेत्रों से विलसित, सुवर्ण वीणा से विराजित, आकांक्षा रहित, सार्थक मन्त्र-तन्त्र के आधार पर त्रिविधतापों को निर्मूल करने वाली प्रसिद्ध मुनियों के द्वारा नमस्कृत, जगद्विदित माँ शारदा को प्रणाम करता हूँ ।

-:९५:-

विख्यातै-र्विबुधै-र्विलासरहितै-र्विध्युक्तसेवारतै-
र्मान्यै-र्मन्त्रविशारदै-र्मुनिवरै-र्मौनीन्द्र-वंशोद्भवैः।
साध्वी सर्वजनोप्सिता सदमला सर्वैर्नुता शारदा,
सर्वेषां हितसाधिका भवतु सा भद्रार्थभाग्येश्वरी।।

-:९६:-

भो मातर्भवदीयभव्यचरितं भक्तलिसंप्रेरकं,
विद्वद्भिर्विविधागमेषु सततं व्यावर्णितं श्रूयते।
ये भक्तास्तव पादपद्ममलं सन्दर्शकाः सन्त्यहो,
तेऽपि त्वाममरेन्द्रवन्दितपदां नो विस्मरन्त्यम्बिके।।

श्लो० सं० (९५)

सर्वविदित देवताओं के द्वारा त्यागशील महात्माओं के द्वारा, स्वीकृत दायित्व के निर्वहण में तल्लीन व्यक्तियों के द्वारा, समादरणीयों के द्वारा, मन्त्र शास्त्र के मर्मज्ञों द्वारा, श्रेष्ठ मुनियों के द्वारा, महात्माओं के परम्परा में अनुबन्धितों के द्वारा, सेवित, आदर्श चरितवाली, सभी से अपेक्षित, निर्मल, सर्वसाधारण से संस्तुत, सभी के हितकारिणी माँ शारदा हितकर भाग्य की प्रदायिका हों ।

श्लो० सं० (९६)

हे माता आपके आदर्शमय जीवन भक्तों के प्रेरणादायक है तथा आपका वह निर्मल चरित्र विद्वानों द्वारा विविध आगमों में विस्तार पूर्वक वर्णित है । ऐसा सुना जाता है । जो भक्त आपके महिमा मण्डित विशुद्धचरणारविन्दों का दर्शन कर चुके हैं उनलोग भी देवताओं के ऐश्वर्यप्रदायकों के द्वारा नमस्कृत आपके चरणारविन्दों को कभी भी भूल नहीं सकेंगे ।

-:९७:-

त्वद्भक्ता दयनीयदीनवचनैस्त्वामर्थितारो हृदा,
तेषामार्तगिरं सदा सविनयामाकर्ण्य सा भारती।
गत्वा तत्र महेश्वरी विनुतसद्वात्सल्यभावान्विता,
तेषामुद्धरणे सदास्ति निरतेत्याकणर्यते सन्ततम् ।।

-:९८:-

साध्वीं शाश्वतशारदां सुरुचिरां संगीतशास्त्रे रतां,
भक्तैर्भावितदेवतामखिलदां भक्तालिसंवेष्टिताम्।
भव्यां भूगतभारतीञ्च ललितां सौम्याञ्च स्तुत्यास्पदं,
वन्दे मामकदेवतामतिसितामासादितां मातरम्।।

श्लो० सं० (९७)

माँ भारती! विपद्वलयों से त्रस्त होकर, आपके भक्त त्रिकरण पूर्वक दीनवचनों से आपकी प्रार्थना करते हैं तो, अत्यन्त विनम्र उनलोगों के आर्तनाद को सुनकर, तत्काल उनलोगों के पास पहुँचकर सभी के द्वारा संस्तुत, वास्तविक वात्सल्यभाव से विशिष्ट होकर, उनलोगों को उस विपत् से उद्धार करने के निमित्त निरन्तर आप व्यस्त हो जाते हैं । ऐसा सुना जाता है ।

श्लो० सं० (९८)

मर्यादा की मूर्ति बनकर रहने वाली, अत्यन्त मनोहर, संगीत शास्त्र में तल्लीन, भक्तों के द्वारा स्वीकृत, देवता के रूप में विलसित, सम्पूर्ण मनोरथों को पूर्ण करने वाली, भक्तों के द्वारा परिवृत, अलौकिक होकर धराधाम पर विराजमान, चित्ताकर्षक, अत्यन्त सात्विक, स्तवनीय, अपने आराध्य देवता के रूप में स्वीकृत, उज्ज्वलस्वरूपिणी माँ भारती को मेरा प्रणाम है ।

-:९९:-

आद्यामाद्यजनेरिता-मनुपमा-मादीप्तादिव्याननां,
शुद्धां तां शुभदेवतां प्रियतमां प्रेमास्पदं धीप्रदाम्।
श्रुत्यास्मारितदेवतां मुहुरहो मन्त्राक्षरैर्ज्ञापितां,
वन्दे वाक्पतिभूषितामधिगतामार्योक्तसद्देवताम्।।

-:१००:-

भो मातर्भवदीयभव्यकृपया लोकोत्तरैः शंसितां,
सर्वैः स्वीकृतसेव्यनव्यपदवीमारुह्य कालान्तरे।
ख्यातिं सर्वजनोप्सितां बहुनुतामासाद्य शोभन्विताः,
सन्तीत्यत्र किमद्भुतं तव कृपालभ्यं हि सर्वं सुखम्।।

श्लो० सं० (९९)

सम्पूर्ण जगत् के आविर्भाव के पूर्व में आविर्भूत, प्राक्तन मनीषियों के द्वारा अधिगत, असदृश, आलौकिक आभा विशिष्ट मुखारविन्दवाली तथा निर्मल, शुभदान्वित देवता के रूप में सुप्रसिद्ध, प्रियतम एवं प्रीति के योग्य, बुद्धि के प्रदायिका होकर रहनेवाली, वेद के द्वारा विज्ञापित देवता के रूप में विराजमान एवं मन्त्राक्षरों से संस्मारित, ब्रह्माजी के द्वारा विदित एवं समलङ्कृत, आर्यो के द्वारा अभिवर्णित विशिष्ट देवता के रूप में रहने वाली माँ भारती को प्रणाम है ।

श्लो० सं० (१००)

माँ शारदा आप ही के अलौकिक कृपा से, सर्वोत्कृष्ट व्यक्तियों द्वारा प्रशंसित, सभी के द्वारा स्वीकृत सेव्य एवं नव्य पद को प्राप्त करके, कुछ दिन व्यतीत होने के उपरान्त, सभी से अभीप्सित एवं अनेकों द्वारा संस्तुत गौरव को अर्जित कर शोभान्वित हो जाते हैं । इस प्रकार के अभ्युन्नति प्राप्त करने में आश्चर्य ही क्या है ? यह सब आप की ही कृपा लभ्य है ।

-:१०१:-

ये मान्याः किल विश्वमानव इति ख्याताः सदा सन्त्यहो,
तद्धेतुर्ननुभूतले प्रतिदिनं तैः कारिता तावकी।
पूजा वा मुहुरत्र मान्यचरिते पुण्येन वा साधिता,
मन्ये मातुरहेतुकी तव कृपा सर्वैर्नुता स्वीकृता।।

-:१०२:-

ये विप्राः ननु भारते सुविदितं भूदेवाताज्ञापकं,
लब्ध्वा देहमहर्निशं धनिकवद् वित्ताय यत्ने रताः।
ते नूनं परधर्ममोहवशतो विस्मृत्य वंशोचितं,
हित्वा वा विधिसम्मतं जनिगतं कृत्यं न किं कुर्वते।।

श्लो० सं० (१०१)

जिन व्यक्तियों ने विश्वमानव इस प्रकार के गौरव को अर्जित कर चुके हैं । उसका मूल कारण इस धरातल पर आपकी कृपा को प्राप्त करने के निमित्त उनलोगों द्वारा कराई गई आपकी पूजा अथवा पुण्य के द्वारा अधिगत सामर्थ्य नहीं है किन्तु सभी के द्वारा स्वीकृत आपकी कृपा से ही वे लोग उस विशिष्ट ख्याति को प्राप्त किये थे । निष्कलङ्क चरित्रवाली माँ भारती मेरा मानना है कि आप ही के निर्मल कृपा ही उन लोगों के सर्वोत्कृष्ट अभ्युन्नति का हेतु है ।

श्लो० सं० (१०२)

जिन ब्राह्मणों ने अपने इस भारत में सबके द्वारा स्वीकृत भूदेवता के ज्ञापक शरीर को प्राप्तकर, निरन्तर वित्तोपार्जन की चिन्ता में तल्लीन है । वे अवश्य ही अपने वंश के गौरव को भूलकर, परधर्मरूपी मोह के वशवर्ती होकर, अथवा शास्त्र सम्मत या अपने जन्मजात मर्यादा को छोड़कर, विधि के विपरीत कार्य तो नहीं कर रहे हैं ? सारस्वतिक चिन्ता से निर्मुक्त होकर अन्य धर्म को अपनाना श्रेयस्कर नहीं है ।

-:१०३:-

भव्ये भारतभूतले जनिगता विप्रा असन्मार्गगाः,
भो मातर्यदि ते भवेयुरनिशं लोकस्य का वा गतिः।
सद्विप्राश्रितभूतलं विकलितं स्यादत्र लोकाम्बिके,
को वा तत्परिरक्षकः क्षिततले हित्वा कृपावीक्षणम्।।

-:१०४:-

ये विप्राः शुभदां सदा बुधनुतां लब्ध्वा तनुं शंसितां,
हित्वा मातुरुपासनं शुभयुतं संसर्गदोषादिना।
नानाव्याकुलदोषदूषणयुतं कृत्यं कुमार्गान्वितं,
कुर्वन्त्यत्र सुधीजनैरपनुतं निन्द्यं न किं कुर्वते।।

श्लो० सं० (१०३)

जगत्प्रसिद्ध इस भारत के भूभाग पर जन्म लिए हुए विप्र, शास्त्र के द्वारा निर्दिष्ट मार्ग को छोड़कर, भिन्न मार्गों का अनुसरण करने लगते हैं तो, इस भारत की क्या गति होगी ? ब्राह्मणों के आदेश निर्देशों के अनुसार ही अन्य वर्णों का प्रचलन है । ज्येष्ठ एवं श्रेष्ठ होकर अपने नियत कृत्यों से विचलित हो जाते है तो, माँ आपके कृपावीक्षण के अतिरिक्त इस समाज को सुव्यवस्थित करने का अन्य कोई उपाय नहीं है। पथभ्रष्टों के पथ प्रदर्शिका तो, आप ही है न?

श्लो० सं० (१०४)

जो विप्र शुभदायक एवं निरन्तर बुधसन्नुत शरीर को प्राप्त कर सारस्वतिक समुपासना अर्थात् अत्यन्त श्रेयोदायक वेदवेदांगों का अध्ययन छोड़कर, संसर्ग या सङ्दोष से अनेक प्रकार के चिन्ताओं से युक्त एवं नाना प्रकार के दोषों से दूषित तथा शास्त्र निन्दित कार्य करते हैं तो, वह कार्य सज्जनों से तिरस्कृत निन्द्य कार्य नहीं है ? अवश्य ही वे लोग निन्द्यकार्य कर रहे हैं।

-:१०५:-

पाश्चात्त्यैः सुनियोजिताच्च कुटिलात् सम्प्रत्यहो सात्त्विकं,
यावद्विश्वजनैः सदात्र विनुतं मार्गञ्च हित्वा जनाः।
दुर्दिष्ट्या परितः प्रचारितथे भ्रान्त्या तु गच्छन्त्यमी,
तान्मार्गे परिचालनाय जननि त्वत्सत्कृपां कामये।।

-:१०६:-

आसीद्यद्भुवने सदा सुरनुतं भूभागमेकं स्वकं,
ख्यातास्ते गुरवः प्रसिद्धमुनयः शास्त्रार्थमर्मेरिताः।
एतेषामनुकम्पया भरतभूरद्यापि विभ्राजते,
तत्त्राणेऽत्र कृपाकटाक्षममलं काङ्क्षामहे तावकम्।।

श्लो0 सं0 (१०५)

वैदेशिकों के द्वारा सुविचारित एवं सुनियोजित कुटिलता के कारण, इस समय अत्यन्त सात्विक एवं सम्पूर्ण विश्वमानवों के द्वारा निरन्तर संस्तुत मार्ग को छोड़कर, अपने राष्ट्र के युवावर्ग, अपने दुर्भाग्य से और उन लोगों का द्वारा प्रचारित पथ के पथिक बनकर, भ्रान्ति के कारण इधर-उधर भ्रमण करते हैं । शान्तिप्रदायक मार्ग को छोड़कर स्वच्छन्द विचरण करनेवाले इन लोगों को सन्मार्ग पर संचालन के निमित्त आप ही की कृपा की आवश्यकता है ।

श्लो0 सं0 (१०६)

सम्पूर्ण विश्व में देवताओं के द्वारा सन्नुत एक भूभाग अपना भारत है । यहाँ के आचार्य एवं सुप्रसिद्ध मनीषीमहर्षियों ने शास्त्रों के अर्थ एवं अभिप्राय के मर्मज्ञ होकर, अभूतपूर्व गौरव को अर्जित कर चुके हैं । इन्हीं लोगों के कृपा के कारण भरतभूमि आज भी गौरवान्वित है । इस अनादिकालीन गौरव की परिरक्षा के निमित्त आप के अमोघ एवं निर्मल कृपाकटाक्ष की कामना करते हैं ।

-:१०७:-

नित्यं त्वात्मसुखास्पदं सुविदितं लोकेषु यद्दुर्लभं,
तत्सर्वं सुरभारती सरससंल्लापेन नो लभ्यते।
तस्माद् भारतवासिभिर्व्रतमिदं सर्वैः सदा स्यान्मुदा,
भारत्याः परिपोषणे समुचितं तद्रक्षणे स्वीकृतम्।।

-:१०८:-

अन्ये येऽपरिपक्वरिक्तमतयो वैदेशिकैः प्रेरिताः,
व्यामोहाद् भ्रमिता भवन्ति बहुधा धावन्ति हित्वा स्वकान्।
सेव्या सेव्यानिरूपणे भरतभूसंरक्षणे तत्परा,
सा माता स्थिरभारती भवतु नो नव्यार्थ-विस्तारिणी।।

श्लो० सं० (१०७)

अनुभवगम्य सुविदित नित्यात्मक जो आत्मसुख है । वह संस्कृत से अनायास ही अवगत होने वाला है । इसलिए सभी भारतवासी इस सुरभारती की रक्षा एवं इसकी संवर्धन अथवा व्यापक प्रचुर प्रचार के निमित्त दत्तचित्त होकर सहर्ष लग जाना चाहिए । यह संस्कृत सम्बन्धी अभिनव व्रत सामयिक एवं सामूहिक सहयोग की अपेक्षा रखता है । जब तक इस प्रकार का सामूहिक व्रत का संकल्प नहीं लिया जाता है तबतक इस सन्दर्भ में आंशिक सफलता ही प्राप्त कर सकेंगे ।

श्लो० सं० (१०८)

माँ भारती! बहुत लोग अपरिपक्व एवं जडमति होकर वैदेशिकों से अर्थात् पश्चिमी सभ्यता से प्रेरित होकर, अविलम्ब अमीर होने की कामना से भ्रमित होकर, घर में रहने वाले असहाय माता पिता अथवा वृद्धों को छोड़कर अन्यत्र चले जाते हैं । सामयिक व्यवहारों के उद्बोधिका एवं उचित तथा अनुचित निर्णय में निपुण तथा भरत भूमि के संरक्षण में तत्पर माँ चिरन्तन भारती हमलोगों से अपेक्षित नूतन वस्तुओं की प्रदायिका हों । जिससे भरतवासियों का पलायन अवरूद्ध हो सकें ।

-:१०९:-

भो मातर्बहवश्चिराद्द्विजवरा मार्गं च वेदोदितं,
हित्वा ते श्रुतिसम्मतं सुरुचिरं क्लेशापनोदात्मकम्।
विक्षेपान्वितवित्तसर्जकसृतिं चिन्वन्ति साक्षेपकं,
नेदं सद्गतिकारकं मुर्निवरैः सर्वात्मना निन्दितम्।।

-:११०:-

ये विप्रा विधिनोदितं विदितषट्कर्माख्यमार्गं भ्रमात्,
हित्वाऽन्यद् विपरीतमार्गगमकं वित्तञ्च नेतुं मुदा।
कौटिल्याद् यदि ते विहाय शुभदं वाञ्छन्ति शप्तास्त्वमी,
ते नूनं पितृभिः सदाऽत्र कुपितैर्गच्छन्ति निन्द्यं गतिम्।।

श्लो० सं० (१०९)

माँ भुवन भारती! बहुत से द्विजश्रेष्ठ कई दशकों से वेद के द्वारा निरूपित शास्त्रसम्मत, सुन्दर मार्ग को छोड़कर जो सम्पूर्ण कष्टों के आगारस्वरूप वित्तोपार्जक मार्ग का चयन कर लेते हैं। यह मार्ग न तो सद्गति का कारक हो सकता है और न महनीय मनीषियों से संस्तुत है। मुनिजन निन्दित एवं अपगति के हेतुभूत इस प्रकार के मार्ग को बुद्धिजीवी द्वजवर चयन न कर सके तो समाज का बहुत ही श्रेय सम्भव है ।

श्लो० सं० (११०)

जो विप्र होकर विधि के द्वारा उद्बोधित षट्कर्मयुक्त मार्ग को छोड़कर तथा भ्रान्त होकर विभिन्न मार्गों के द्वारा सहर्ष वित्त के उपार्जन में लग जाते हैं और नाना प्रकार कुटिल अर्थात् निन्द्य मार्गों से वित्तोपार्जक बन जाते है तो, वे लोग शुभद मार्ग को छोड़कर अशुभ मार्ग के पथिक बन जाने के कारण, अपने कुपित पितृदेवताओं से अभिशप्त होकर निम्द्यगति को प्राप्त कर लेते है । अतः विप्र होकर अन्य मार्गों का अनुसरण करना श्रेयस्कर नहीं है ।

-:१११:-

यद्वा विस्तृतभारते द्विजवरा लब्ध्वा महत्वं पदं,
तस्मादर्जितगौरवं चिरतरं तं त्रातुमिच्छेत् सदा।
तेऽवश्यं कुलदूषकं प्रियजनैर्नाङ्गीकृतं जीवनं,
सामान्यैरिव यापयेन्न मलिनं स्मृत्वा च स्वोत्कर्षकम्।।

-:११२:-

लोकेऽस्मिन् बहुभिः श्रुतास्ति सुजनैर्यत्प्रापणे यादृशो
नैवं प्राग्वदपेक्षते नियमतस्त्याज्ये च भूरिश्रमः।
तस्माद् वैदिकमार्गगाः प्रचलितं भूदेवताज्ञापकं,
स्वीयं विश्वगुरुत्वसूचकपदं संरक्षयेयुः सदा।।

श्लो० सं० (१११)

इस व्यापक भरत खण्ड में द्विजश्रेष्ठ होकर भूदेवता के रूप में अधिगत महत्वपूर्ण पद को प्राप्त कर, उस पद के द्वारा अर्जित गौरव को चिरकाल पर्यन्त सुरक्षित रखना चाहते हैं तो वे लोग अपने कुल को दूषित करने वाले तथा अपने हितैषियों से निराकृत जीवन अर्थात् सामान्य व्यक्तियों की तरह अपने जीवन को व्यतीत न करें । अपने उत्कर्ष को ध्यान में रखकर ऐसे निन्द्य जीवन को छोड़ देनेमें ही श्रेय है ।

श्लो० सं० (११२)

अनेकों सज्जनों के द्वारा इस धरातल पर सुना जाता है कि जिसकी प्राप्ति के निमित्त जितने प्रयास की आवश्यकता होती है उसको छोड़ने में उतने प्रयास की आवश्यकता नहीं है। इसलिए वैदिक मार्ग के अनुयायी होकर चिरकाल से प्रचलित एवं संरक्षित अपने भूदेवता के ज्ञापक गौरव को एवं विश्वगुरुत्व के गरिमामय महत्वपूर्ण पद की रक्षा के निमित्त तत्पर हो जाना चाहिए ।

-:११३:-

यद्वा स्वार्जितगौरवं बहुनुतं केनापि सद्धेतुना,
नास्तं तद्गमयेदितीह बहुधा सञ्चिन्त्यतद्रक्षणे।
कुर्युः सार्थकचिन्तनं मतिमतैः सद्बान्धवैः श्रेष्ठगै-
र्नोचेदत्र सुनिश्चितादपगतेस्तद्रक्षणं दुस्तरम्।।

-:११४:-

तस्माद् वैदिकमार्गगाः प्रथमतो मार्गञ्च सर्वैर्नुतं,
विस्मृत्यापि न सन्त्यजेयुरिह नो लोभादिना लोभिताः।
नो चेद् भारतगौरवं क्षितितले संक्षीयते सत्वरं,
यत्पूर्वं किल पूर्वजैश्च महतो भूरिश्रमात् ख्यापितम्।।

श्लो० सं० (११३)

अनेकों द्वारा संस्तुत, अपने पूर्वजों द्वारा अधिगत, यह गौरव किसी न किसी प्रबल हेतु से अपने हाथ से निकलने न पावे। इस विषय पर विचार करें । वह विचार विद्वज्जनों से अपने हितचिन्तकों से और अनुभवी श्रेष्ठजनों से होने पर सार्थक हो सकती है । अन्यथा वैदेशिक छद्म व्यवहारों से अपने हाथ से छूट जाने पर उन दोनों की रक्षा दुस्तर हो जायेंगी। संस्कृत के प्रति आजकल के युवाओं में जो निस्पृहता आ गई है । इस अशुभ लक्षण को देखते हुए इस प्रकार का विचार सामयिक ही है ।

श्लो० सं० (११४)

इसलिए सर्वप्रथम वैदिक मार्ग के समुपासक, प्रलोभनों के प्रलोभ की वशवर्ती होकर, सभी के द्वारा संस्तुत इस शुभद मार्ग को भूल से भी न छोड़े । इस बात की उपेक्षा करते रहने पर भारत का गौरव घटना सुनिश्चित है । भारत का यह जो गौरव प्राप्त है यह पूर्वजों के चिरकालीन कठोर तप के द्वारा तथा परिश्रम के द्वारा परिव्याप्त किया गया है । इसकी रक्षा का दायित्व सभी का होने पर भी, अधिक दायित्व वैदिकों के ऊपर ही है ।

-:११५:-

भो मातर्बहवश्चिरात्तव कृपामासाद्य पृथ्वीतले,
विख्याता विमलाः कवीन्द्रकुलजा वागीशकल्पाः पुरा।
श्रद्धा भक्तियुतास्त्वदीयचरणे पुष्पाञ्जलिं सादरं,
दत्वा ते चरितार्थदिव्यचरिता आसँश्च मोदान्विताः।।

-:११६:-

श्रद्धेयैः प्रथितैः प्रदर्शितसृतौ गन्तुं सदा तत्परः,
पद्यैर्गुम्फितदिव्यरत्नकलितां ग्रैवेयिकां त्वन्मुदे।
काङ्क्षन्नस्मि समर्पणाय जननि प्राक्पूर्वजैस्तोषिते!
नीत्वा दीप्तियुतां नवीनसुभगां संतुष्यतात् सन्ततम्।।

श्लो० सं० (११५)

माँ भारती इस धराधाम पर बहुत से लोग चिरकाल से आपकी कृपा प्राप्त करके आदर्श चरित्र वाले होकर, विद्वत्परिवार के होकर, साक्षात् ब्रह्माजी के सदृश गौरव प्राप्त कर चुके हैं। वे लोग श्रद्धा एवं भक्ति के साथ आपके चरणों में अत्यन्त आदर के साथ कृतज्ञता पूर्वक श्रद्धासुमन समर्पित करके सार्थक एवं स्तवनीय चरितवाले होकर सन्तुष्ट हो गये थे ।

श्लो० सं० (११६)

प्रसिद्ध एवं श्रद्धा के आस्पद उन पूर्वजों के द्वारा प्रदर्शित मार्ग पर चलने की अपेक्षा से, आपके तुष्टि के निमित्त श्लोकों के द्वारा रचित दिव्यरत्नसदृश कण्ठाभरण को, पूर्वजों के द्वारा परितोषित माँ भारती, आपको समर्पित करना चाहते हैं । अत्यन्त देदीप्यमान अभिनव एवं सौन्दर्य विशिष्ट इस कण्ठाभरण को स्वीकार करते हुए आप निरन्तर सन्तुष्ट हों ।

-:११७:-

भो मातर्जगदम्ब ताविकमिदं मोदास्पदं भक्तिदं,
स्तोत्रं संरचितं त्वदीयकृपया स्नेहेन सत्प्रेरणात्।
यद्यप्यस्मि नितान्तशुष्कहृदयो वाञ्छामि वाग्वैभवं,
श्रद्धाभक्तिदृढेच्छया प्रतिदिनं वन्देऽङ्घ्रिपाथोरुहम्।।

-:११८:-

अहं मन्दबुद्धिर्यथाज्ञानशून्यस्
तथापि त्वदीयाङ्घ्रिभक्त्या नियुक्तः।
प्रसूनाञ्जलिं ते पदाम्भोजयुग्मे,
ददन् कामयेऽतः प्रसीद प्रसीद।।

श्लो० सं० (११७)

जगन्माता आपके सन्तुष्टि के निमित्त आनन्द एवं भक्ति के प्रदायक इस स्त्रोत की रचना, आपकी ही प्रेरणा से और आप ही के सहज स्नेह से तथा आप की ही कृपा से की गई है। माँ वस्तुस्थिति यह है कि मैं तो पूर्णतया शुष्क हृदय वाला हूँ । न भाव है और भक्ति, फिर भी वाग्रूप वैभव की अपेक्षा करता हूँ । इस निमित्त आपको देने योग्य मेरे पास क्या है ? तथापि निष्कपट श्रद्धा एवं भक्ति के साथ सहज इच्छा से प्रतिदिन आपके चरणारविन्दों में अवनतशिरस्क होकर प्रणाम करता हूँ ।

श्लो० सं० (११८)

मैं तो मन्द बुद्धि वाला हूँ । आप के यथावत् गुणगान के निमित्त अपेक्षित ज्ञान से वंचित हूँ । फिर भी आपके चरणारविन्दों की भक्ति से प्रेरित होकर तथा नियोजित होकर, आप के चरणारविन्दों में स्तोत्र रूपी इस सुमनांजलि को अर्पित करते हुए, मात्र आप से इतनी ही प्रार्थना है कि आप अनुग्रह करें पुनः पुनः अनुग्रह करें । आप का अनुग्रह ही मेरा सर्वाथ साधक है और सर्वस्व है ।

-:११९:-

अनेकरूपैरनुबद्धविग्रहां
सुरासुरैः सेवितसौम्यशारदाम्।
मदीयजन्मान्तरपुण्यदीपितां,
नमामि देवीं निखिलैरभीप्सिताम्।।

-:१२०:-

श्रीशारदाप्रसादार्थं चिरादीप्सितभूषणम्।
कण्ठाभरणनामेदं कण्ठे तिष्ठतु संततम्।।

-:१२१:-

शिवानन्दप्रदं चेदं शिवानन्देन गुम्फितम्।
शिवानन्दकरं भूयात् शिवदानन्द-सूचकम्।।

श्लो० सं० (११९)

अनेक रूपों में अनुबन्धित मूर्ति मानकर, देवदानवों से सेवित सरस शारदा को, मेरे जन्मान्तर पुण्य पुंज से अवगत एवं सभी के द्वारा अपेक्षित मानकर प्रणाम करता हूँ ।

श्लो० सं० (१२०)

माँ शारदा के सन्तुष्टि के निमित्त एवं चिरकाल से अपेक्षित कण्ठाभरण नामक यह भूषण निरन्तर आपके कण्ठ सीमा को समलङ्कृत करते रहें ।

श्लो० सं० (१२१)

शिवद आनन्द के हेतुभूत यह स्तोत्र, शिवानन्द के द्वारा आरचित, शिवद आनन्द के संसूचक, कल्याण कारक आनन्द के प्रदायक हों ।

फलश्रुतिः

यो वै सभक्तिकमिदं सरसातिरम्यं,
प्रेम्णा प्रभातसमये पठतीहनित्यम्।
सद्यः सुधीन्द्रसदने सुजनैरुपेतः,
ख्यातिञ्च काम्यसहितां लभते प्रदीप्ताम्।।
यद्वा प्रभातसमये विबुधैर्विगीतां,
श्रीशारदां सुललितां सकलैरुपास्याम्।
भद्रात्मिकां बहुनुतां भवतापहन्त्रीं,
संसेव्य सौख्यमतुलं लभते प्रशस्तम्।।

फल-श्रुति

जो अत्यन्त भक्ति के साथ सरस एवं अतिमनोहर अभिनव इस स्त्रोत को प्रातःकालीन समय पर प्रेम से तन्मय होकर पाठ करते हैं । वह व्यक्ति विद्वानों के सदन में सज्जनों से परिवृत होकर, अपनी समस्त कामनाओं के साथ अविलम्ब सर्वोत्कृष्ट ख्याति को प्राप्त कर लेता है ।

अथवा प्रातःकालीन समय पर विद्वज्जनों के द्वारा संस्तुत, सभी के द्वारा समुपासित अनेकों द्वारा कीर्तित, सांसारिक तापों के निवारण करने वाली, कल्याणकारिका एवं मनोहारिणी माँ शारदा की सेवा करके असदृश एवं प्रशंसनीय सुख को प्राप्त कर लेता है ।

परिकल्पितेऽयं परिकल्पना

तन्त्रीवादन-तत्परामन्वीक्ष्य,
तत्रानुगुञ्जायमानाह्लादक-रवमाकर्ण्य।
तद्रवमनुक्रियते-सरिगमपदनिरतां ताम्...
रिरिद, रिरिद, रिरि, गग, निपधाम्।।सरि।।
चतुर-चतुर-चतुरानन-निगदित-
ललित-ललित-कर-पल्लव-लालित।
विबुध-विबुध-वदनावलि-शोभित,
तरुण-अरुण-अम्बुजनिभचरणां ताम्।।
ताम् ताम् तनुगत-अरुणाम्,
करुणां, करुणाकर-नुतनमिताम्।
त्रिभुवन-नत-नुत-श्रित-महिताम्,
विधिना, विधिभूषितसितलसिताम् ताम्।।

परिशिष्टे विविधगीतयः

"किमधिकंब्रूमहे"

भो भो शिष्टा जगतिविशिष्टाः परार्थभावने तुष्टाः।
भारतनामकभूपरिरक्षणे सार्थकचेष्टाः कुवन्तु।।
भो भो सन्तो हृदिविलसन्तो भारतभुविराजन्तो।
अखण्ड भारतविकासविषये, अविरलचेष्टाः कुर्वन्तु।।
हृदिविभ्राजं समग्रपूज्यं स्वीयसुखास्पदराष्ट्रम्।
मा भूत्पश्चिमप्रचारप्रसरं परमतदोषैर्दूष्यम्।।
समरसचित्तान् सदमलवृत्तान् बुबोध्यस्नेहापन्नान्।
सदाचिरन्तनभूपरिरक्षणे निष्ठायुतबहुशूरान्।।
भव्यं नव्यं भूतलस्वर्गं कर्तुं कल्पलताख्यम्।
भूरिपरिश्रमसाध्यं मत्वा हित्वा दैन्यविलापम्।।
सन्ति विभेदाः समुदितखेदास्तथाऽपि गुणता नेया।
क्लेशविशेषं मा सह भ्रातर् मा सह दुर्जनदौष्ट्यम्।।
सुविदितसुन्दरभावापन्नं सकलैर्भावितनव्यम्।
नेयं ध्येयं विबुधविधेयं श्रेयोदायककार्यम्।।
ममतामूलकमतैक्यमेकं निबोध्यजनताहृदये।
सनातनाख्यं सदा सदाख्यं राज्यं व्याज्यविहीनम्।।
त्रातुं शक्यं नेतुं शक्यं समृद्धिशिखरारूढम्।
नो चेन्मातुः समग्रराष्ट्रं नो शक्यं परित्रातुम्।।
हिन्दूनामकसागरगम्यं हिमालयाख्याच्छिखरात्।
सखे सदासीत्समग्रराष्ट्रं हैन्दवभूपतिभोग्यम्।।
मा कुरु प्रान्तविभेदं धीमन् मा कुरु भाषाभेदम्।
मतगतभेदं मा कुरु श्रीमन् महानर्थकमूलम्।।
विहाय भेदान् विदितविखेदान् स्मृत्वा, सार्थकयत्नान्।
कृत्वा भारत भू परिरक्षणे सुखीभविष्यथ नित्यान्।।

स्वतन्त्रतादिवससन्दर्भे — रचयिता

दिनांक १५.८.२००४ -: 卐 :- शिवानन्दब्रह्मचारी

वाराणसी — टेकरामठस्थः

भवेद् भारतं भव्यदायकम्

वन्दे राष्ट्रध्वजम्, मुहुरभिनन्दे राष्ट्रध्वजम्,
समृद्धभारत समृद्धिसूचक सुविदित राष्ट्रध्वजम् ।।वन्दे।।

सुधीरविक्रमशौर्यसमन्वितसुललितराष्ट्रध्वजम्,
गण्यगुणाम्बुधिगान्धिसमीहितगतियुतराष्ट्रध्वजम् ।।वन्दे।।

कवीन्द्रकीर्तितकान्तिपुञ्जयुतकामितराष्ट्रध्वजम्,
त्यागशीलसुजनालिसमाश्रितसेवितराष्ट्रध्वजम् ।।वन्दे।।

पूनीतपूर्वजजल्पितकल्पितशिल्पितराष्ट्रध्वजम्,
दाक्षिण्यान्वितधर्मकर्मयुतधार्मिकराष्ट्रध्वजम् ।।वन्दे।।

महिततपोनिधिभावसमन्वितमञ्चितराष्ट्रध्वजम्,
प्रफुल्लजनताऽऽराधितरञ्जितपूजितराष्ट्रध्वजम् ।।वन्दे।।

धीरवीरनुतधैर्यधामयुतधीप्रदराष्ट्रध्वजम्,
शास्त्रसमाश्रितसार्वभौमनुतसात्त्विकराष्ट्रध्वजम् ।।वन्दे।।

स्वतन्त्रभारतगौरवगोपनेज्ञापकराष्ट्रध्वजम्,
दुर्जनदुर्नयदौष्ट्यसमापने गर्जितराष्ट्रध्वजम् ।।वन्दे।।

सौम्यजनाश्रितसर्वजनादृतस्वीकृतराष्ट्रध्वजम्,
स्वाभिमानयुतसात्त्विकजीवनख्यापकराष्ट्रध्वजम् ।।वन्दे।।

पूज्यजनेरितप्रेमप्रपूरितप्रेरितराष्ट्रध्वजम्,
सर्वाकर्षकरीतिनीतियुतस्नेहिलराष्ट्रध्वजम् ।।वन्दे।।

महिमामण्डितमहीजनेप्सितमौलिकराष्ट्रध्वजम्,
प्रधीप्रदीपितसुधीसुदीपितशंसितराष्ट्रध्वजम् ।।वन्दे।।

मान्यजनेरितमन्त्रतन्त्रयुतमञ्जुलराष्ट्रध्वजम्,
द्वेषविवर्जितदिव्यगुणैर्युतदीपितराष्ट्रध्वजम् ।।वन्दे।।

सहजदयान्वितशान्तिदान्तियुतसर्जितराष्ट्रध्वजम्,
भावितभूषितभव्यगुणैर्युतभारतराष्ट्रध्वजम् ।।वन्दे।।

स्वतन्त्रतादिवससन्दर्भे
दिनांक १५.८.२००५
वाराणसी

-: 卐 :-

रचयिता
शिवानन्दब्रह्मचारी
टेकरामठस्थः

"भारतमीदृशंभवेत्"

भवतु भारतं भवतु भारतं भूरिभाग्यदायकं भवतु भारतम्।
भवतु भारतं भवतु भारतं दिविजतुल्यदिव्यभव्यसौख्यदायकम्।।
तोषकारकं पोषकारकं, तोषपोषकरकं भवतु भारतम्।
रोषवारकं दोषवारकं रोषदोषवारकं भवतुभारतम्।।
भुक्तिदायकं मुक्तिदायकं भुक्तिमुक्तिदायकं भवतुभारतम्।
भक्तिदायकं शक्तिदायकं भक्तिाक्तिदायकं भवतुभारतम्।।
रीतिपोषकं नीतिपोषकं रीतिनीतिपोषकं भवतुभारतम्।
रामभूषितं नामभूषितं रामनामभूषितं भवतुभारतम्।।
भेदवारकं खेदवारकं भेदखेदवारकं भवतुभारतम्।
श्यामकामितंकामकामितंश्यामकामकामितंभवतुभारतम्।।
मन्त्रपोषकं तन्त्रपोषकं मन्ततन्त्रपोषकं भवतुभारतम्।
नोदकारकं मोदकारकं नोदमोदकारकं भवतुभारतम्।।
पापहारकं तापहारकं पापतापहारकं भवतुभारतम्।
ज्ञानवर्धकं मानवर्धकं ज्ञानमानवर्धकं भवतुभारतम्।।
धर्मरक्षकं कर्मरक्षकं धर्मकर्मरक्षकं भवतुभारतम्।
धीरसर्जकं वीरसर्जकं धीरवीर सर्जकं भवतुभारतम्।।
शस्त्रसज्जितं शास्त्रसज्जितं शस्त्रशास्त्रसज्जितं भवतुभारतम्।
तुष्टिकारकं पुष्टिकारकं तुष्टिपुष्टिकारकं भवतुभारतम्।।
योगरञ्जितं भोगरञ्जितंयोगभोगरञ्जितं भवतुभारतम्।
यज्ञरक्षकं यागरक्षकं यज्ञयागरक्षकं भवतुभारतम्।।

स्वतन्त्रतादिवससन्दर्भे
दिनांक १५.८.२००४
वाराणसी

-: 卐 :-

रचयिता
शिवानन्दब्रह्मचारी
टेकरामठस्थः

हैन्दवैरवधेयमेतत्

श्रूयतां विगीयतां हिन्दुता न हीयताम् । भेदमूलकारणं मूलतो निवार्यताम् ॥

एकता न हीयता —मैक्यता समीयताम् । मातृभूनिषेवणे व्यग्रता विधीयताम् ॥

सावधानपूर्वकं श्रूयतां विधार्यताम् । पापमूलकारणं पारतन्त्र्य—जीवनम् ॥

भोग्यभूरियातना साधिता स्वतन्त्रता । ताञ्च रक्षणे समेत्य धीर भो विचार्यताम् ॥

कस्य दोषकारणात् हिन्दुता कृशङ्गता । दिव्यता दिवङ्गतेति वीर भो समीक्ष्यताम् ॥

वेषभूषहेतुकं भेदभाव—सूचकम् । तं विहाय मोमुदा स्थैर्यता विधीयताम् ॥

आगमोक्तमैक्यतां सुधीजनैरुपासिताम् । वैमनस्यतां विहाय मित्र भो सुसेव्यताम् ॥

यावनीयपीडनं म्लेच्छनेतृताडनम् । नो कदापि जायतामेत्य भो विचिन्त्यताम् ॥

ज्ञानदायिनी सदा मानदायिनी सदा । स्वर्गतुल्यभुक्तिदाऽपवर्गदायिनी सदा ॥

एतदीय—शासने रक्षणेऽभिवर्धने । स्वीयभागदेयतां तूर्यमापूर्यताम् ॥

स्वीय—वंशगौरवं वीक्ष्य सार्वभौमिकम् । स्वाभिमानमात्मनो हिन्दुता विगीयताम् ॥

भाग्नीय—भारती भव्यता विगीयताम् । मातृभूविशेषतां ज्ञाप्य भो प्रचार्यताम् ॥

—:卐:—

स्वतन्त्रतादिवस सन्दर्भे

शिवानन्द ब्रह्मचारी

ॐ

गणतन्त्रदिवससन्दर्भे

-:०:-

धीरकेतनम् वीरकेतनम् ।
भारतीय भव्यभूनिरूप्यकेतनम् ॥ धीर
चक्रयुक्तवर्णत्रितयकान्तिकेतनम् ।
सर्वदाभिनन्द्यवन्द्यराष्ट्रकेतनम् ॥ धीर
गर्वरहितगीतकीर्तिगान्धिकेतनम् ।
राष्ट्ररीतिनीतिनिपुणनेहरुकेतनम् ॥ धीर
मन्त्रमूर्तिमालवीयमान्यकेतनम् ।
लोपरहितलोकमान्यतिलककेतनम् ॥ धीर
विश्वविदितकाव्यसृङ्रवीन्द्रकेतनम् ।
हिन्दुराष्ट्रक्रान्तिकृत् सुभाषुकेतनम् ॥ धीर
सर्वश्रेष्ठसमरशक्तिसूच्यकेतनम् ।
समुपलब्धज्ञानविज्ञानकेतनम् ॥ धीर

टेकरामठस्थः -: 卐 :- रचयिता
वाराणसी शिवानन्दब्रह्मचारी

प्रकाशन के निमित्त प्रतीक्षा रत -

1. कमलाकटाक्षवीक्षणम् (लक्ष्मीस्तुतिः)
2. शाम्भवीस्तोत्रल्लरी (कालिकास्तुतिः)





रचयिता

शिवानन्द ब्रह्मचारी

डी 54/1 टेकरामठ

जङ्गमण्डी, लक्सा, वाराणसी

-: शारदाभिनन्दनम् :-

श्रीकरी वाग्झरी संस्तुता शाङ्करी
सेविता स्यात्सदा सर्वसम्पत्करी।
सार्वभौमाश्रिता सर्वविद्याकरी
शारदा सारदा भारते भ्राजताम्।।

पूर्वजैः प्रार्थिता पण्डितैः कीर्तिता
पूजिता स्यात्सदा पुण्यदा प्रीतिदा।
भूषणै- र्भूषिता भूतिदा भव्यदा
शारदा सारदा भारते भ्राजताम्।।

वाक्पतेरीडिता वीरधीरैः स्तुता
वन्दिता स्यात्सदा शान्तिदा दान्तिदा।
दीप्तदिव्यानना दिव्यदेवेरिता
शारदा सारदा भारते भ्राजताम्।।

नीतिदा निर्मला निश्चला वाक्प्रिया
सर्वलोकाश्रिता सर्वदा शर्मदा।
राजिता रञ्जिता रम्यगात्रान्विता
शारदा सारदा भारते भ्राजताम्।।

नादविद्यान्विता नारदेनेरिता
पूर्वजा प्रोज्ज्वला प्रार्थिता चेत्सदा।
मन्मनोह्लादिका मातृभावान्विता
शारदा सारदा भारते भ्राजताम्।।

तापसैर्याचिता तापसम्मोचिका
तुष्टिदा पुष्टिदा तृप्तिभावान्विता।
धीजनैर्दीपिता धीप्रदा स्यात्सदा
शारदा सारदा भारते भ्रजताम्।।

-: 卐 :-